॥ आ पोथि ने रुतपूर्वार्द्ध नि छे॥

पुवार्द्धना अध्यायानां नाम ने खंड कां संख्या छे		
सत्ताम्नायः॥	१	२७
॥	२	३६
	३	२५
एकाथ[illegible]राद्यं॥	४	२९
सस्त्रीमविंदचरेतेनदिनां॥	५	३१
त्वमग्नेद्युभिस्त्वमा॥	६	३९
		१८७

पं. कागाहीतरांमजी
नोछे पुरखारद्दनीछे

॥०

उँ३म्र

॥ॐ नमो गणेशाय नमः॥ समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघंटव इत्याचक्षते निघंटवः कस्मान्निगमा इमे भवंति छंदोभ्यः समाहृत्य समाहृत्य समाम्नातास्ते निगंतव एव संतो निगमनान्निघंटव उच्यंत इत्यौपमन्यवोपि वा हननादेव स्युः समाहता भवंति यद्वा समाहृता भवंति तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवंति तत्रैतं नामाख्यातयोर्लक्षणं प्रदिशंति भावप्रधानमाख्यातं सत्वप्रधानानि नामानि तद्यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यंतं मूर्तं सत्वभूतं सत्वनामभिर्व्रज्यापक्तिरित्यद इति सत्वानामुपदेशः ॥१॥ गौरश्वः पुरुषो हस्तीति भवतीति भावस्यास्ते शेते व्रजति तिष्ठतीतींद्रियनित्यं वचनमौदुंबरायणस्तत्र चतुष्ट्वं नोपपद्यते युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः शास्त्रकृतो योगश्च व्याप्तिमत्वात्तु शब्दस्याणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके तेषां मनु

ति

ष्यवद्देवताभिधानंपुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मंत्रोवेदे॥२॥षड्भा
वविकाराभवंतीतिवार्ष्यायणिर्जायतेस्तिविपरिणमतेवर्द्धतेप
क्षीयतेविनश्यतीतिजायतइतिपूर्वभावस्यादिमाचष्टेनापरभा
वमाचष्टेनप्रतिषेधत्यस्तीत्युत्पन्नस्यसत्वस्यावधारणंविपरिणम
तइत्यप्रच्यवमानस्यतत्वाद्विकारंवर्द्धतइतिस्वांगास्युच्चयंसांयो
गिकानांवार्थानांवर्द्धतेविजयेनेतिवावर्द्धतेशरीरेणेतिवाप
क्षीयतइत्येतेनैवव्याख्यातःप्रतिलोमंविनश्यतीत्यपरभावस्या

॥२

दिमाचष्टेनपूर्वभावमाचष्टेनप्रतिषेधति॥३॥अतोन्येभावविकारा
एतषामेवविकाराभवंतीतिहस्माहतेयथावचनमभ्यूहितव्या
ननिर्बद्धाउपसर्गाअर्थान्निराहुरितिशाकटायनोनामाख्यात
योस्तुकर्मोपसंयोगाद्योतकाभवंत्युच्चावचाःपदार्थाभवंतीति
गार्ग्यस्तद्यएषुपदार्थःप्राहुरिमेतंनामाख्यातयोरर्थविकरणं
॥४॥आइत्यर्वागर्थेप्रपरेत्येतस्यप्रातिलोम्यमभीत्याभिमुख्यं
प्रतीत्येतस्यप्रातिलोम्यमतिसुइत्यभिपूजितार्थेनिर्दुरित्येतयोः

प्रातिलोम्यंन्यवेतिविनिग्रहार्थीयाउदित्येतयोःप्रातिलोम्यंसमि
त्येकीभावंव्यपेत्येतस्यप्रातिलोम्यमन्वितिसादृश्यापरभावमपीति
संसर्गमुपेत्युपजनंपरीतिसर्वतोभावमधीत्युपरिभावमैश्वर्यं
विवमुच्चावचानर्थान्प्राहुस्तउपेक्षितव्याः॥ ५॥ प्रथमाध्यायस्यप्रथ
मःपदः॥ अथनिपाताउच्चावचेष्वर्थेषुनिपतंत्यप्युपमार्थेपिकर्मोप
संग्रहार्थेपिपदपूरणास्तेषामेतेचत्वारउपमार्थेभवंतीवेतिभा
षायांचान्वध्यायंचाग्निरिवेंद्रइवेतिनेतिप्रातिषेधार्थीयोभाषायामु

भयमन्वध्यायं॥ नेंद्रंदेवममंसतेति॥ प्रतिषेधार्थीयः पुरस्तादुपाचा
रस्तस्ययत्प्रतिषेधतिदुर्मदासोनसुरायामित्युपमार्थीयउपरिष्टादु
पाचारस्तस्यायानापमिमीते॥ ६॥ चिदित्येषोनेककर्माचार्यश्चिदि
दंब्रूयादितिपूजायामाचार्यआचारंग्राहयत्याचिनोत्यर्थानाचि
नोतिबुद्धिमितिवादधिचिदित्युपमार्थेकुल्माषांश्चिदाहरेत्यवकुत्सि
तेकुल्माषाःकुलेषुसीदंतिनुइत्येषोनेककर्मेदंनुकरिष्यतीतिहेत्व
पदेशेकथंनुकरिष्यतीत्यनुपृष्टेनन्वेतदकार्षीरितिचाथाप्युपमा

र्थेभवति॥७॥ वृक्षस्यनुतेपुरुहूतवयाः॥वृक्षस्यवतेपुरुहूतशाखाव
याः शाखावेतेर्वातायनाभवंतिशाखाः खशयाः शक्नोतर्वाथय
स्यागमादर्थपृथक्त्वमहविज्ञायातनत्वौद्देशिकमिवविग्रहेण
पृथक्त्वात्सकर्मोपसंग्रहश्चेतिसमुच्चयार्थउभाभ्यांसंप्रयुज्यते॥
अहंचत्वंचवृत्रहन्नित्येतस्मिन्नेवार्थे॥देवेभ्यश्चपितृभ्यएत्याकारः॥व
तिविचारणार्थे॥हंताहंपृथिवीमिमांनिदधानीहवेहवेत्यथापि
समुच्चयार्थेभवति॥वायुर्वात्वामनुर्वात्वेति॥८॥अहइतिचहइ

तिचविनिग्रहार्थीयौपूर्वेणसंप्रयुज्यते अयमहेदंकरोत्वयमिदमिदं
हकरिष्यतीदंनकरिष्यतीत्यथाप्युकारएतस्मिन्नेवार्थउत्तरेण
मृषेमेवदंतिसत्यमुतेवदंतीत्यथापिपदपूरणइदमुतदुहीत्येषो
नेककर्मेदंहिकरिष्यतीतिहेत्वपदेशेकथंहिकरिष्यतीत्यनुपृष्टेक
थंहिव्याकरिष्यतीत्यसूयायांकिलेतिविद्याप्रकर्षेएवंकिलेत्य
थापिननुइत्येताभ्यांसंप्रयुज्यतेनुपृष्टेनकिलैवंननुकिलैवमे
तिप्रतिषेधेमाकार्षीरितिचखल्वितिचखलुकृत्वाखलुकृत

० नाहषी

मथापिपदपूरणाएवंखलुतद्बभ्रवेतिशाश्वदितिविचिकित्सार्थीयोभा
षायांशाश्वदेवमित्यनुपृष्टएवंशाश्वदित्यः स्वयंपृष्टेनूनमितिविचि
कित्सार्थीयोभाषायामुभयमन्वध्यायंविचिकित्सार्थीयश्चपदपू
रणश्चागस्त्यइंद्रायहविर्निरुप्यमरुद्भ्यः संप्रदित्सांचकारसइं
द्रएत्यपरिदेवयांचक्रे ॥ ९ ॥ ननूनमस्तिनोश्वः कस्तद्वेदयदद्भुतं ॥
अन्यस्यचित्तमभिसंचरेण्यमुताधीतंविनश्यति ॥ ननूनमस्त्यद्य
तनंनोएवश्वस्तनमद्यास्मिंद्यविद्युरित्याह्नोनामधेयंद्यातत इ

॥ ५ ॥
श्री

तिसतश्च उपाशंसनीयः कालोह्योहीनः कालः ॥ कस्तद्वेदयदद्भुतं ॥ क
स्तद्वेदयदभूतमिदमपीतरदद्भुतमभूतमितिवान्यस्यचित्तमभिसंच
रेण्यमभिसंचार्यन्योनानयश्चित्तंचेततेरुताधीतंविनश्यतीत्याध्यात
मभिप्रेतमथापिपदपूरणः ॥ १० ॥ नूनंसातेप्रतिवरंजरित्रेदुहीयदिंद्रद
क्षिणामघोनी ॥ शिक्षास्तोतृभ्योमातिधग्भगोनोबृहद्वदेमविदथेसुवी
राः ॥ सातेप्रतिदुग्धांवरंजरित्रेवरोवरयितव्योभवतिजरितागरिता
दक्षिणामघोनीमघवतीमघमितिधननामधेयंमंहतेर्दानकर्मणोद
क्षिणादक्षतेःसमर्द्धयतिकर्मणोव्यृद्धंसमर्द्धयतीत्यपिवाप्रदक्षिणाग

मनाद्दिशमभिप्रेत्यदिग्घस्तप्रकृतिर्दक्षिणोहस्तोदक्षतेरुत्साहकर्मणोदा
शतेर्वास्याद्दानकर्मणोहस्तोहंतेःप्राशुर्हननेदेहिस्तोतृभ्यःकामान्मा
स्मानतिदंहीर्मास्मानतिहायदाभगोनोअस्तुबृहद्वदेमस्ववेदनेभ
गोभजतेर्बृहदितिमहतोनामधेयंपरिवृढंभवतिवीरवंतःकल्या
णवीरावावीरोवीरयत्यमित्रान्वेतेर्वास्याद्गतिकर्मणोवीरयतेर्वासी
मितिपरिग्रहार्थीयोवापदपूरणोवा॥प्रसीमादित्योअसृजत्॥प्रासृज
दितिवा॥प्रासृजत्सर्वतइतिवा॥विसीमतःसुरुचोवेनआवरितिच ॥
व्यवृणोत्सर्वतआदित्यःसुरुचआदित्यरश्मयःसुरोचनादपिवासी ॥६॥

मेत्येतदनर्थकमुपबंधमाददीतपंचमीकर्माणंसीम्नःसीमतःसीमातो
मर्यादातःसीमामर्यादाविसीव्यतिदेशावितित्वइतिविनिग्रहार्थीयंस
र्वनामानुदात्तमर्द्धनामेत्येके॥११॥ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रं
त्वोगायतिशक्वरीषुब्रह्मात्वोवदतिजातविद्यांयज्ञस्यमात्रांविमिमीत
उत्वः॥इत्यृत्विक्कर्मणांविनियोगमाचष्टऋचामेकःपोषमास्तेपुपुष्वान्हो
तर्गर्चनीगायत्रमेकोगायतिशक्वरीषूद्गातागायत्रंगायतेस्तुतिक
र्मणःशक्वर्यऋचःशक्नोतेस्तद्यदाभिर्वृत्रमशकद्धंतुंतच्छक्वरीणांशक्व

रीत्वमितिविज्ञायतेब्राह्मणोजातेजातेविद्यांवदतिब्रह्मासर्वविद्यःसर्वं
वेदितुमर्हतिब्रह्मापरिवृढःश्रुततोब्रह्मपरिवृढंसर्वतोयज्ञस्यमा
त्रांविमिमीतएकोध्वर्युरध्वरयुरध्वर्युरध्वरंयुनक्त्यध्वरस्यनेताध्वरं
कामयंतइतिवापिवाधीयानेयुरुपबंधोध्वरइतियज्ञनामध्वरति
र्हिंसाकर्म्मातत्प्रतिषेधोनिपातइत्येकेतत्कथमनुदात्तप्रकृतिनाम
स्याद्दृष्टव्ययंतुभवति॥ उतत्वंसख्येस्थिरपीतमाहुरितिद्वितीया
यामुतोत्वस्मैतन्वंविसस्रइतिचतुर्थ्यामथापिप्रथमाबहुवचाने ॥१२॥
अक्षण्वंतःकर्णवंतःसखायोमनोजवेष्वसमाबभूवुः॥ आदघ्नास ॥७॥

उपकक्षासउत्वेह्रदाइवस्नात्वाउत्वेददृश्रे॥ अक्षिमंतःकर्णवंतो
क्षिचष्टेरनक्तेरित्याग्रायणस्तस्मादेतेव्यक्ततरेइवभवतइतिह
विज्ञायतेकर्णःकृंततेर्निकृंतद्वारोभवत्यृच्छतेरित्याग्रायणऋच्छ
तीइवखेउदगंतामितिहविज्ञायतेमनसांप्रजवेष्वसमाबभू
वुरास्यदघ्नाअपरउपकक्षदघ्नाअपरआस्यमस्यतेरास्यंदतए
नदंनमितिवादघ्नंदघतेस्रवतिकर्म्मणोदस्यतेर्वास्याद्विदस्ततं
रंभवतिप्रस्नेयाह्रदाइवैकेप्रस्नेयाददृशिरेस्नानार्हाह्रदोह्रादतेः

शब्दकर्म्मणोल्हादतेर्वास्याछीतीभावकर्म्मणोथापिसमुच्चयार्थेभ
वति ॥१३॥ पर्यायाइवत्वदाश्विनमाश्विनंचपर्यायाश्चत्यथयेप्रवृ
त्तेर्थमिताक्षरेषुग्रंथेषुवाक्यपूरणाआगच्छंतिपदपूरणार्थेमिता
क्षरेष्वनर्थकाःकमीमिद्विति ॥ निष्टक्कासश्चिदिंन्नरोभूरितोकावृ
कादिव ॥ बिभ्यस्यंतोववाशिरेशिशिरंजीवनायकं ॥ शिशिरंजीव
नाय शिशिरंशृणातेःशम्नातेर्वा ॥ एमेनंसृजतासुते ॥ आसृजते
नंसुते ॥ तमिद्वर्द्धंतुनोगिरः ॥ तंवर्द्धयंतुनोगिरस्स्तुतयोगिरोगृणातेः ॥
अयमुतेसमतसि ॥ अयंतेसमतसीवोपिदृश्यते ॥१४॥ सुविदुरिव

सुविज्ञायतेइवाथापिनेत्येषइदित्येतेनसंप्रयुज्यतेपरिभये ॥ हवि
र्भिरेकेस्वरितःसचंतेसुन्वंतएकेसवनेषुसोमान् ॥ शचीर्मदंतउतद
क्षिणाभिर्नेज्जिह्मायंत्योनरकंपतामति ॥ नरकंन्यरकंनीचैर्ग
मनंनास्मिन्रमणंस्थानमल्पमप्यस्तीतिवाथापिनचेत्येषइदित्ये
तेनसंप्रयुज्यतेनुपृष्टेनचेत्सुरांपिबंतीतिसुरासुनोतारवमुच्चा
वचेष्वर्थेषुनिपतंतितेउपेक्षितव्याः ॥१५॥ इतिद्वितीयःपादः ॥ इती
मानिचत्वारिपदजातान्यनुक्रांतानिनामाख्यातेचोपसर्गनिपा
ताश्चतत्रनामान्याख्यातजानीतिशाकटायनोनिरुक्तसमयश्च

न्सर्वाणीतिगार्ग्योवैयाकरणानांचैकेतद्यत्रस्वरसंस्कारौसमर्थौ
प्रादेशिकेनगुणेनान्वितौस्यातांसंविज्ञातानितानियथागौरश्वःपुरु
षोहस्तीत्यथचेत्सर्वाण्याख्यातजानिनामानिस्युर्यःकश्चतत्कर्मकु
र्यात्सर्वंतत्सत्वंतथाचक्षीरन्यःकश्चाध्वानमश्नुवीताश्वःसवचनीय
स्याद्यत्किंचित्तृंद्यात्तृणंतदथापिचेत्सर्वाण्याख्यातजानिनामानिस्युर्या
वद्भिर्भावैःसंप्रयुज्येततावद्भ्योनामधेयःप्रतिलंभस्यात्तत्रैवंस्थू
णादर्शयाचासंजनीचस्यात् ॥१६॥ अथापियएषांन्यायवान्कार्मना
मिकःसंस्कारोयथाचापिप्रतीतार्थानिस्युस्तथैनान्याचक्षीरन्पुरुषंपु ॥६॥

रिशयइत्याचक्षीरंनष्टेत्यश्वंतर्द्दनमितितृणमथापिनिष्पंन्नेभिव्याहारेभि
विचारयंतिप्रथनात्पृथिवीत्याहुःकएनामप्रथयिष्यत्किमाधारश्चेत्य
थानन्वितेर्थेप्रादेशिकेविकारेपदेभ्यःपदेतरार्द्धांसंचस्कारशाकटा
यनएतेःकारितंचयकारादिंचांतकरणमस्तेःशुद्धंचसकारादिंचाथा
पिसत्वपूर्वोभावइत्याहुरपरस्माद्भावात्पूर्वस्यप्रदेशोनोपपद्यतइ
तितदेतंनोपपद्यात ॥१७॥ यथोहिनुवाएतत्तद्यत्रस्वरसंस्कारौ
समर्थौप्रादेशिकेनगुणेनान्वितौस्यातांसर्वंप्रादेशिकमित्येवंसत्य
नुपालंभएषभवतियथोएतद्यःकश्चतत्कर्मकुर्यात्सर्वंतत्सत्वंतथा

वक्षीरंनितिपश्यामःसमानकर्मणांनामधेयप्रतिलंभमेकेषांनैकेषां
यथातक्षापरिव्राजकोजीवनोभूमिजइत्येतेनैवोत्तरःप्रत्युक्तोयथो
एतद्यथाचापिप्रतीतार्थानिस्युस्तथैनान्याचक्षीरंनितिसंत्यल्पप्रयो
गाःकृतोप्येकपदिकायथाव्रततिर्दमूनाजाट्यआट्णारोजागरूको
दर्विहोमीतियथोएतंनिष्पन्नेभिव्याहारेभिविचारयंतीतिभवती
हिनिष्पंनेभिव्याहारेयोगपरीष्टिःप्रथनात्पृथिवीत्याहुःकएनाम
प्रथयिष्यत्किमाधारश्चेत्यथवैदर्शनेनपृथुरप्रथिताचेदप्यन्यैः॥१८॥

अथाप्येवंसर्वएवदृष्टप्रवादाउपालभ्यंतेयथोएतत्पदेभ्यःपदेतरार्द्धां
त संचस्कारेतियोनन्वितेर्थेसंचस्कारसतेनगर्ह्यःसैषापुरुषग
र्हायथोएतदपरस्माद्भावात्पूर्वस्यप्रदेशोनोपपद्यतइतिपश्यामः
पूर्वोत्पन्नानांसत्वानामपरस्माद्भावान्नामधेयप्रतिलंभमेके
षांनैकेषांयथाबिल्वादोलंबचूडकइतिबिल्वंभरणाद्वाभेद
नाद्वा॥१९॥अथापीदमंतरेणमंत्रेष्वर्थप्रत्ययोनविद्यतेर्थमप्रति
यतोनात्यंतंस्वरसंस्कारोद्देशस्तदिदंविद्यास्थानंव्याकरणसका

सर्वंस्वार्थसाधकंचयदिमंत्रार्थप्रत्ययायानर्थकंभवतीतिकौत्सोन
र्थकाहिमंत्रास्तदेतेनोपेक्षितव्यंनियतवाचोयुक्तयोनियतानुपू
र्व्याभवंत्यथापिब्राह्मणेनरूपसंपन्नाविधीयंते॥उरुप्रथस्वे
तिप्रथयंति॥प्रोहाणीतिप्रोहत्यथाप्यनुपपन्नार्थाभवंति॥ओ
षधेत्रायस्वैनंस्वाधितेमैनंहिंसीरित्याहहिंसंनथापिविप्रति
षिद्धार्थाभवंति॥एकएवरुद्रोवतस्थेनद्वितीयः॥असंख्यातास
हस्राणियेरुद्राअधिभूम्यां॥अशत्रुरिंद्रजज्ञिषेशतंसेनाअजय
त्साकमिंद्रइत्यथापिजानंतंसंप्रेष्यत्यग्नयेसमिध्यमानायानुब्रूहि

॥११॥

त्यथाप्याहादितिःसर्वमिति॥अदितिर्द्यौरदितिरंतरिक्षमिति॥तदुपरिष्टाद्व्या
ख्यास्यामोथाप्यविस्पष्टार्थाभवंत्यम्यग्यादृश्मिंजारयायिकाणुकेत्यर्थवंतःश
ब्दसामान्यादेतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृग्यजुर्वाभिव
दतीतिचब्राह्मणं॥२०॥क्रीळंतौपुत्रैर्नप्तृभिरितियथोएतन्नियतवाचोयुक्तयो
नियतानुपूर्व्याभवंतीतिलौकिकेष्वप्येतद्यथेंद्राग्नीपितापुत्राविति यथोएत
द्ब्राह्मणेनरूपसंपन्नाविधीयंतइत्युदितानुवादःसभवतियथोएतदनुपपन्ना
र्थाभवंतीत्याम्नायवचनादहिंसाप्रतीयेतयथोएतद्विप्रतिषिद्धार्थाभवंतीति

लौकिकेष्वप्येतद्यथासपत्नोयंब्राह्मणोनमित्रोराजेतियथोएतज्ज्ञानंतंसंप्रेष्य
तीतिजानंतमभिवादयतेजानतेमधुपर्कंप्राहयथोएतददितिःसर्वमितिलौ
किकेष्वप्येतद्यथासर्वरसाअनुप्राप्ताःपानीयमितियथोएतदविस्पष्टार्थाभ
वंतीतिनैषस्थाणोरपराधोयदेनमंधोनपश्यतिपुरुषापराधःसभवतिय
थाजानपदीषुविद्यातःपुरुषविशेषोभवतिपारोवर्यवित्सुतुखलुवेदितृ
षुभूयोविद्यःप्रशस्योभवति॥२१॥तृतीयःपादः॥अथापीदमंतरेणपद
विभागोनविद्यते॥अवसायपद्वतेरुद्रमृळेति॥पद्वदवसंगावःपथ्यदन
मवतेर्गत्यर्थस्यासोनामकरणस्तस्मान्नावगृह्णंति॥अवसायाश्वानिति॥

स्यतिरुपसृष्टोविमोचनेतस्मादवगृह्णंति॥दूतोनिर्ऋत्याइदमाजगामेति
पंचम्यर्थप्रेक्षावाषष्ठ्यर्थप्रेक्षावाःकारांतं॥परोनिर्ऋत्याआचक्ष्वेति॥च
तुर्थ्यर्थप्रेक्षैकारांतंपरःसंनिकर्षःसंहितापदप्रकृतिःसंहितापदप्रकृ
तीनिसर्वचरणानांपार्षदान्यथापियाज्ञेदैवतेनबहवःप्रदेशाभवंतित
देतेनोपेक्षितव्यंतेचेद्ब्रूयुर्लिंगज्ञाअत्रस्मइति॥इंद्रंनत्वाशवसादेवता
वायुंपृणंतीति॥वायुलिंगंचेंद्रलिंगंचाग्नेयेमंत्रेग्निरिवमन्योत्विषितः
सहस्वेत्यथाग्निर्मान्यवेमंत्रेत्विषितोज्वलितस्त्विषिरित्यप्यस्यदीप्तिना
मभवत्यथापिज्ञानप्रशंसाभवत्यज्ञाननिंदाच॥२२॥स्थाणुरयंभार

हारः किलाभूदधीत्यवेदंनविजानातियोर्थं॥ योर्थज्ञइत्सकलंभद्रमश्नुते
नाकमेतिज्ञानविधूतपाप्मा॥ यद्गृहीतमविज्ञातंनिगदेनैवशब्द्यते॥
अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचित्॥ स्थाणुस्तिष्ठतेरर्थोर्त्तेर
रणस्थोवा॥२३॥ उतत्वःपश्यंनददर्शवाचमुतत्वःशृण्वंनशृणोत्येनां॥
उतोत्वस्मैतन्वं१विसस्रेजायेवपत्यउशतीसुवासाः॥ अप्येकःपश्यंन
पश्यतिवाचमपिचशृण्वंनशृणोत्येनामित्यविद्वांसमाहार्द्धमप्येकस्मै
तन्वंविसस्रइतिस्वमात्मानंविवृणुतेज्ञानंप्रकाशनमर्थस्याहान
यावाचोपमोत्तमयावाचाजायेवपत्येकामयमानासुवासाऋतुका

लेषुयथासएनांपश्यतिसशृणोतीत्यर्थज्ञप्रशंसातस्योत्तराभूयसेनिर्व
चनाय॥२४॥ उतत्वंसख्येस्थिरपीतमाहुर्नैनंहिन्वंत्यपिवाजिनेषु॥
अधेन्वाचरतिमाययैषवाचंशुश्रुवांअफलामपुष्पां॥ अप्येकंवाक्स
ख्येस्थिरपीतमाहूरममाणंविपीतार्थंदेवसख्येरमणीयेस्थानइ
तिवाविज्ञातार्थंयंनाप्नुवंतिवाग्ज्ञेयेषुबलवत्स्वप्यधेन्वाह्येषचरति
माययावाक्प्रतिरूपयानास्मैकामांदुग्धेवाग्दोह्यांदेवमनुष्यस्थानेषुयो
वाचंश्रुतवानभवत्यफलामपुष्पामित्यफलास्माअपुष्पावाग्भवतीतिवा
किंचित्पुष्पफलेतिवार्थंवाचःपुष्पफलमाहयाज्ञदैवतेपुष्पफलेदेवता

धप्सात्मेवा ॥२५॥ साक्षात्कृतधर्माण ऋषयो बभूवुस्तेवरेभ्योसाक्षात्कृतधर्म
भ्य उपदेशेन मंत्रान्संप्रादुरुपदेशाय ग्लायंतोवरे बिल्मग्रहणायेमं ग्रंथं
समाम्नासिषुर्वेदं चावेदांगानि च बिल्मं भिल्मं भासनमिति वैतावंतः
समानकर्माणो धातवो धातुर्दधातेरेतावंत्यस्य सत्वस्य नामधेयान्ये
तावतामर्थानामिदमभिधानं नैघंटुकमिदं देवतानामप्राधान्येनेद
मिति तद्यदन्यदेवते मंत्रे निपतति नैघंटुकं तत् ॥२६॥ अश्वं न त्वा वार
वंतं ॥ अश्वमिव त्वा वालवंतं वाला दंशवारणार्था भवंति दंशो दशतेः ॥
मृगो न भीमः कुचरो गिरिष्ठाः ॥ मृग इव भीमः कुचरो गिरिष्ठा मृगो

मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्भीष्मोप्येतस्मादेव कुचर इति चरति
कर्म कुत्सितमथ चेद्देवताभिधानं क्वायं न चरतीति गिरिष्ठा गिरि
स्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान्पर्वतः पर्व पुनः पृणा
तेः प्रीणातेर्वार्द्धमासपर्व देवानस्मिन्प्रीणंतीति तत्प्रकृतीतरत्संधि
सामान्यान्मेघस्थायी मेघोपि गिरिरेतस्मादेव तद्यानि नामानि प्रा
धान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद्व्याख्या
स्यामो नैघंटुकानि नैगमानिहिह ॥२७॥ प्रथमोध्यायः ॥ समाप्तः

॥ॐ अथनिर्वचनं ॥ तद्येषुपाद्षुस्वरसंस्कारौसमर्थौप्रादेशिकेनविका
रेणान्वितौस्यातांतथातानिनिर्ब्रूयादथानन्वितेर्थेप्रादेशिकेविकारे
र्थनित्यःपरीक्षेतकेनचिद्वृत्तिसामान्येनाविद्यमानेसामान्येप्य
क्षरवर्णसामान्यान्निर्ब्रूयान्नत्वेवननिर्ब्रूयांनसंस्कारमाद्रियेतवि
शयवत्योहिवृत्तयोभवंतियथार्थंविभक्तीःसंनमयेत्प्रत्तमवत्तमितिधा
त्वादीएवशिष्येते ॥१॥ अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपोभवतिस्तः
संतीत्यथाप्यंतलोपोभवतिगत्वागतमित्यथाप्युपधालोपोभवतिज
ग्मतुर्जग्मुरित्यथाप्युपधाविकारोभवतिराजादंडीत्यथापिवर्णलो

पोभवतितत्वायामीत्यथापिद्विवर्णलोपस्तृचइत्यथाप्यादिविपर्ययोभवतिज्यो
तिर्घनोबिंदुर्वाट्यइत्यथाप्याद्यंतविपर्ययोभवतिस्तोकारज्जुःसिकतास्तर्क्वि
त्यथाप्यंतव्यापत्तिर्भवति ॥२॥ ओघोमेघोनाधोगाधोवधूर्मध्वित्यथापिव
र्णोपजनआस्थद्द्वारोभरूजेतितद्यत्रस्वरादनंतरांतस्थांतर्धातुर्भवति
तद्विप्रकृतीनांस्थानमितिप्रदिशंतितत्रसिद्धायामनुपपद्यमानायामि
तरयोपपिपादयिषेत्तत्राप्येकेल्पनिष्पत्तयोभवंतितद्यथैतदूतिर्मृदुः
पृथुःपृषतःकुणारुमित्यथापिभाषिकेभ्योधातुभ्योनैगमाःकृतोभाष्यं

पा०

तेदमूनाःक्षेत्रसाधाइत्यथापिनिगमेभ्योभाषिकाउष्णंघृतमित्यथापिप्रकृ
तयएवैकेषुभाष्यंतेविकृतयएकेषु॥२॥शवतिर्गतिकर्माकंबोजेष्वेवभा
ष्यंतेकंबोजाःकंबलभोजाःकमनीयभोज्जावाकंबलःकमनीयोभव
तिविकारमस्यार्येषुभाषंतेशवइतिदातिर्लवनार्थेप्राच्येषुदात्रमुदी
च्येष्वेवमेकपदानिनिर्ब्रूयादथतद्धितसमासेष्वेकपर्वसुचानेकप
र्वसुचपूर्वंपूर्वमपरमपरंप्रविभज्यनिर्ब्रूयाद्दंड्यःपुरुषोदंडमर्हती
तिवादंडेनसंपद्यतइतिवादंडोददातेर्धारयतिकर्मणोक्रूरोददते
मणिमित्यभिभाषंतेदमनादित्यौपमन्यवोदंडमस्याकर्षतीतिगर्हायां ॥१६

॥४॥कक्ष्यारज्जुरश्वस्य॥कक्षंसेवतेकक्षोगाहतेःक्सइतिनामकरणःख्याते
र्वानर्थकोभ्यासःकिमस्मिन्ख्यानमितिकषतेर्वातत्सामान्यान्मनुष्यक
क्षोबाहुमूलसामान्यादश्वस्यराज्ञःपुरुषोराजपुरुषोराजाराजतेःपुरु
षःपुरिशादःपुरिशयःपूरयतेर्वापूरयत्यंतरित्यंतरपुरुषमभिप्रेत्य॥य
स्मात्परंनापरमस्तिकिंचिद्यस्मान्नाणीयोनज्यायोस्तिकिंचित्वृ
क्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वमित्यपिनिगमो
भवति॥५॥विश्वकद्राकर्षोवीतिचकद्रइतिश्वगतौभाष्यतेद्रातीतिग
तिकुत्सनाकद्रातीतिद्रातिकुत्सनाचकद्रातिकद्रातीतिसतोनर्थ

कोभ्यासस्तदस्मिंनस्तीतिविश्वकद्रुः कल्याणवर्णरूपः कल्याणवर्णस्येवा
स्यरूपंकल्याणंकमनीयंभवतिवर्णोवृणोतेरूपंरोचतेरेवंतद्धितसमासां
निर्ब्रूयांनैकपदानिनिर्ब्रूयांन्नावैयाकरणायनानुपसन्नायानिदंविदे
वानित्यंह्यविज्ञातुर्विज्ञानेसूयोपसन्नायतुनिर्ब्रूयाद्योवालंविज्ञातुंस्यान्मे
धाविनेतपस्विनेवा॥ ४॥ विद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टे
हमस्मि॥ असूयकायानृजवेयतायनमाब्रूयावीर्यवतीतथास्यां॥ यआ
तृणत्यवितथेनकर्णावदुःखंकुर्वंनमृतंसंप्रयछन्॥ तंमन्येतपितरंमा

॥१७॥

तरंचतस्मैनद्रुह्येत्कतमच्चनाह॥ अध्यापितायेगुरुंनाद्रियंतेविप्रावाचाम
नसाकर्मणावा॥ यथैवतेनगुरोर्भोजनीयास्तथैवतान्नभुनक्तिश्रुतं
तत्॥ यमेवविद्याःशुचिमप्रमत्तंमेधाविनंब्रह्मचर्योपपन्नं॥ यस्तेनद्रु
ह्येत्कतमच्चनाहतस्मैमाब्रूयानिधिपायब्रह्मंनितिनिधिःशेवधिरि
ति॥ १॥ प्रथमःपादः॥ अथातोनुक्रमिष्यामोगौरितिपृथिव्यानामधेयं
यद्दूरंगताभवतियच्चास्यांभूतानिगछंतिगातेर्वौकारोनामकरणो
थापिपशुनामेहभवत्येतस्मादेवाथाप्यस्यांताद्धितेनकृत्स्नवंनिग

माभवंतिगोभिःश्रीणीतमत्सरमितिपयसोमत्सरःसोमोमंदतेस्तृप्तिक
र्मणोमत्सरइतिलोभनामाभिमत्तएनेनधनंभवतिपयःपिबतेर्वाप्या
यतेर्वाक्षीरंक्षरतेर्घसेर्वेरोनामकरणउशीरमितियथा॥अंशुंदु
हंतोअध्यासतेगवीत्यधिषवणचर्मणोंशुःशमष्टमात्रोभवत्यनना
यशंभवतीतिवाचर्मचरतेर्वोच्चृतंभवतीतिवाथापिचर्मचश्लेष्माच ॥
गोभिःसंनद्धोअसिवीलयस्वेतिरथस्तुतावथापिस्नावचश्लेष्माच ॥
गोभिःसंनद्धापततिप्रसूतेतीषुस्तुतौ॥ज्यापिगौरुच्यते॥गव्याचे

त्ताद्धितमथचेन्नगव्यागमयतीषूनिति॥८॥वृक्षेवृक्षेनियतामीमयद्गौ
स्ततोवयःप्रपतान्पूरुषादः॥वृक्षेवृक्षेधनुषिधनुषिवृक्षोव्रश्चनांनिय
तामीमयद्गौःशब्दंकरोतिमीमयतिःशब्दकर्माततोवयःप्रपतंतिपु
रुषानदनायविरितिशकुनिनामवेतेर्गतिकर्मणोथापीषुनामेहभ
वत्येतस्मादेवादित्योपिगौरुच्यते॥उतादःपरुषेगवि॥पर्ववतिभा
स्वतीत्यौपमन्यवोथाप्यस्यैकोरश्मिश्चंद्रमसंप्रतिदीप्यतेतदेतेनोपे
क्षितव्यमादित्यतोस्यदीप्तिर्भवतीति॥सुषुम्णःसूर्यरश्मिश्चंद्रमागंध

र्वस्यापिनिगमोभवति॥सोपिगौरुच्यते॥अत्राहगोरमन्वतेतितदु
परिष्टाद्व्याख्यास्यामः सर्वेपिरश्मयोगावउच्यंते॥६॥तावांवास्तून्यु
श्मसिगमध्यैयत्रगावोभूरिशृंगाअयासः।अत्राहतदुरुगायस्य
वृष्णःपरमंपदमवभातिभूरि॥तानिवांवास्तूनिकामयामहेगमना
ययत्रगावोबहुशृंगाभूरीतिबहुनोनामधेयंप्रभवतीतिसतः
शृंगंश्रयातर्वाशृणातेर्वाशम्नातेर्वाशरणायोद्गतमितिवाशिर
सोनिर्गतमितिवायासोयनातत्रतदुरुगायस्यविष्णोर्महागतेः

॥१९

परमंपदंपरार्द्ध्यस्थमवभातिभूरिपादःपद्यतेस्तंनिधानात्पदंपशु
पादःप्रकृतिःप्रभागपादःप्रभागपादसामान्यादितराणिपदान्येव
मन्येषामपिसत्वानांसंदेहाविद्यंतेतानिचेत्समानकर्माणिसमान
निर्वचनानिनानाकर्माणिचेन्नानानिर्वचनानियथार्थंनिर्वक्तव्या
नीतीमान्येकविंशतिःपृथिवीनामधेयान्यनुक्रांतानितत्रनिर्ऋति
र्निरमणादृच्छतेःकृच्छ्रापत्तिरितरासापृथिव्यासंदिह्यतेतयोर्विभा
गस्तस्याएषाभवति॥१०॥यईंचकारनसोअस्यवेदयईंददर्शहि
रुगिन्नुतस्मात्॥समातुर्योनापरिवीतोअंतर्बहुप्रजानिर्ऋतिमा

विवेश॥ बहुप्रजाःकृच्छ्रमापद्यतइतिपरिव्राजकावर्षकर्मेतिनिरुक्ताय
ईचकारेतिकरोतिकिरतीसंदिग्धोवर्षकर्मणानसोअस्यवेदमध्यमः
सएवास्यवेदमध्यमोयोदद्दर्शादित्योपहितंसमातुर्योनोमातांतरिक्षं
निर्मीयंतेस्मिन्भूतानियोनिरंतरिक्षंमहानवयवःपरिवीतोवायुनाय
मपीतरोयोनिरेतस्मादेवपरियुतोभवतिबहुप्रजाभूमिमापद्यतेव
र्षकर्मणाशाकपूणिःसंकल्पयांचक्रेसर्वादेवताजानानीतितस्मैदेव
तोभयलिंगाप्रादुर्बभूवतांनजज्ञेतांपप्रच्छविविदिषाणित्वेतिसास्मा

॥२०

एतामृचमादिदेशैषामद्देवतेति॥११॥ अयंसशिंक्तेयेनगौरभीवृतामिमा
तिमायुंध्वसनावधिश्रिता॥ साचित्तिभिर्निहिचकारमर्त्यंविद्युद्भवंतीप
तिवव्रिमौहत॥ अयंसशब्दायतेयेनगौरभिप्रवृत्तामिमातिमायुंश
ब्दंकरोतिमायुमिवादित्यमितिवावागेषामाध्यमिकाध्वंसनेमाद्यधि
श्रितासाचित्तिभिर्निकरोतिमर्त्यंविद्युद्भवंतीप्रत्यूहतेवव्रिंवव्रिरितिरू
पनामवृणोतीतिसतोवर्षेणप्रच्छाद्यपृथिवींतत्पुनरादत्ते॥१२॥ द्वितीयः
पादः॥ हिरण्यनामान्युत्तराणिपंचदशहिरण्यंकस्माद्ध्रियतआयम्य

माननमितिवाक्रियपतेजनाज्जनमितिवाहितरमणंभवतीतिवाहर्यतेर्वा
स्यात्येषाकर्मणांतरिक्षनामान्युत्तराणिषोडशांतरिक्षंकस्मादंत
राक्षांतंभवत्यंतरामेइतिवाशरीरेष्वंतरक्षयमितिवातत्रसमुद्र
इत्येतत्पार्थिवेनसमुद्रेणसंदिह्यतेसमुद्रःकस्मात्समुद्रवंत्यस्मादा
पःसमभिद्रवंत्येनमापःसंमोदंतस्मिन्भूतानिसमुदकोभवतिस
मुनत्तीतिवातयोर्विभागस्तत्रेतिहासमाचक्षतेदेवापिश्चार्ष्टिषेणः
शंतनुश्चकौरव्यौभ्रातरौबभूवतुःसशंतनुःकनीयानभिषेच ॥२१॥

यांचक्रेदेवापिस्तपःप्रतिपेदेततःशंतनोराज्येद्वादशवर्षाणिदेवोन
ववर्षतमूचुर्ब्राह्मणाअधर्मस्त्वयाचरितोज्येष्ठंभ्रातरमंतरित्या
भिषेचितंतस्मात्तेदेवोनवर्षतीतिसशंतनुर्देवापिंशिशिक्षराज्ये
नतमुवाचदेवापिःपुरोहितस्तेसानियाजयानिचत्वेतितस्यैतद्व च पा०
र्षकामसूक्तंतस्यैषाभवति॥१२॥आर्ष्टिषेणोहोत्रमर्निषीदंदेवा बि
पिर्देवसुमतिंचिकित्वान्॥सउत्तरस्मादधरंसमुद्रमपोदिव्या
असृजद्वर्ष्याअभि॥आर्ष्टिषेणऋष्टिषेणस्यपुत्रइषितसेनस्येतिवा

सेनासेश्वरासमानगतिर्वापुत्रःपुरुत्रायतेनिपरणाद्वापुंनरकंततस्त्रा
यतइतिवाहोत्रमृषिर्निषीदंन्नृषिर्दर्शनात्स्तोमांददर्शेत्यौपमन्य
वस्तद्यदेनांस्तपस्यमानान्ब्रह्मस्वयंभ्वभ्यानर्षत्तदृषीणामृषित्व
मितिविज्ञायतेदेवापिर्देवानामाप्त्यास्तुत्याचप्रदानेनचदेवसु
मतिंदेवानांकल्याणींमतिंचिकित्वांश्चेतनावान् ॥ सउत्तरस्मादध
रंसमुद्रं ॥ उत्तरउद्धततरोभवत्यधरोधोरोधोनधावतीत्यूर्ध्वग
तिःप्रतिषिद्धातस्योत्तराभूयसेनिर्वचनाय ॥१४॥ यद्देवापिःशंत

॥२२

नवेपुरोहितोहोत्रायवृतःकृपयन्नदीधेत् ॥ देवश्रुतंवृष्टिवनिंररा
णोबृहस्पतिर्वाचमस्माअयछत् ॥ शंतनुःशंतनोस्त्वितिवाशम
स्मैतन्वास्त्वितिवापुरोहितःपुरएनंदधातिहोत्रायवृतःकृपाय
माणोन्वध्यायद्देवश्रुतंदेवाएनंशृण्वन्तिवृष्टिवनिंवृष्टियाचिनंरराणोरा
तिरभ्यस्तोबृहस्पतिर्ब्रह्मासीत्सोस्मैवाचमयछद्बृहदुपव्याख्या
तं ॥१५॥ तृतीयःपादः ॥ साधारणान्युत्तराणिषड्दिवश्चादित्यस्य
चयानितुस्वस्यप्राधान्येनोपरिष्टात्तानिव्याख्यास्यामः ॥ आदित्यःकस्मा

दादत्तेरसान्नादत्तेभासंज्योतिषामादीप्तोभासेतिवादितेःपुत्रइतिवाल्प
प्रयोगंत्वस्यैतदार्चभ्याम्नायेसूक्तभाक्सूर्यमादितेयमन्यासामपि
देवतानामादित्यप्रवादास्तुतयोभवंतितद्यथैतन्मित्रस्यवरुण
स्यार्यम्णोदक्षस्य [illegible] भगस्यांशस्यतथापिमित्रावरुणयोः॥
आदित्यादानुनस्पती॥दानपती॥अथापिमित्रस्यैकस्य॥प्रसमि
त्रमर्त्तोअस्तुप्रयस्वान्यस्तआदित्यशिक्षतिव्रतेनेत्यपिनिगमोभ
वत्यथापिवरुणस्यैकस्य॥अथावयमादित्यव्रतेतव॥व्रतमितिक

॥२३॥

ति
र्मनामनिवृत्तिकर्मवारयतीसतइदमपीतरद्व्रतमेतस्मादेववृणोती
तिसतोन्नमपिव्रतमुच्यतेयदावृणोतिशरीरं॥१६॥स्वरादित्योभ
वतिसुअरणःसुईरणःस्वृतोरसान्स्वृतोभासंज्योतिषांस्वृतो
भासेतिवितेनद्यौर्व्याख्याता॥१७॥पृश्निरादित्योभवतिप्राश्नुतए
नंवर्णइतिनिरुक्ताःसंस्प्रष्टारसांसंस्प्रष्टाभासंज्योतिषांसंस्पृष्टो
भासेतिवाथद्यौःसंस्पृष्टाज्योतिर्भिःपुण्यकृद्भिश्च॥१८॥नाकआ
दित्योभवतिनेताभासांज्योतिषांप्रणयोथद्यौःकमितिसुखना

मत्तस्यातिषिद्धंप्रतिषिध्येत ॥ नवा अमुंलोकंजग्मुषेकिंचनाकं ॥ नवा अ
मुंलोकंजग्मुषेकिंचनासुखंपुण्यकृतोह्येवतत्रगछंति ॥ १९ ॥ गौरा
दित्योभवति गमयतिरसान्गछत्यंतरिक्षेथद्यौर्यत्पृथिव्या अ
धिदूरंगताभवतियच्चास्यांज्योतींषिगछंति ॥ २० ॥ विष्टवादित्यो
भवत्याविष्टोरसानाविष्टोभासंज्योतिषामाविष्टोभासेतिवाथ
द्यौराविष्टाज्योतिर्भिःपुण्यकृद्भिश्च ॥ २१ ॥ नभ आदित्योभवति
नेताभासांज्योतिषांप्रभवोपिवाभनएवस्याद्विपरीतोनभाती

तिवितेनद्यौर्व्याख्याता ॥ २२ ॥ चतुर्थःपादः ॥ रश्मिनामान्युत्तराणिपंच
दशरश्मिर्यमनात्तेषामादितःसाधारणानिपंचाश्वरश्मिभिर्दिङ्ना
मान्युत्तराण्यष्टौदिशःकस्माद्दिशतेरासदनादपिवाभ्यशनात्तत्र
काष्ठाइत्येतदनेकस्यापिसत्त्वस्यभवतिकाष्ठादिशोभवंतिक्रांत्वा
स्थिताभवंतिकाष्ठाउपदिशोभवंतीतरेतरंक्रांत्वास्थिताभवं
त्यादित्योपिकाष्ठोच्यतेक्रांत्वास्थितोभवत्याज्यंतोपिकाष्ठोच्यते
क्रांत्वास्थितोभवत्यापोपिकाष्ठाउच्यंतेक्रांत्वास्थिताभवंती

तिष्ठावराणां ॥२३॥ अतिष्ठंतीनामनिवेशनानां काष्ठानां मध्ये निहि
तं शरीरं ॥ वृत्रस्य निण्यं विचरंत्यापो दीर्घं तम आशयदिंद्रशत्रुः ॥

अतिष्ठंतीनामनिविँमानानामित्यस्थावराणां काष्ठानां मध्ये नि
हितं शरीरं मेघः शरीरं शरीरं शृणातेः शम्नातेर्वा वृत्रस्य निर्णा
मं विचरंति विजानंत्याप इति दीर्घं द्राघतेस्तमः तनोतेराशयदा
शयतेरिंद्रशत्रुरिंद्रोऽस्य शमयिता वा शातयिता वा तस्मादिंद्रशत्रु
स्तत्को वृत्रो मेघ इति निरुक्ता अपां च ज्योतिषश्च मिश्रीभावकर्मणो ॥२५॥

वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवंत्यहिवत्तु खलु मंत्रवर्णा
ब्राह्मणवादाश्च विवृद्ध्या शरीरस्य स्रोतांसि निवारयांचकार तस्मि
न्हते प्रसस्यंदिर आपस्तदभिवादिन्येषर्ग्भवति ॥२४॥ दासपत्नीर
हिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ॥ अपां बिलमपि
हितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥ दासपत्नीर्दासाधिपत्न्यो दा
सो दस्यतेरुपदासयति कर्माणि अहिगोपा अतिष्ठन्नहिना गुप्ता अहि
रयनादेत्यंतरिक्षे अयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग

आहंतीति। निरुद्धा आपः पणिनेव गावः पणिर्वणिग्भवति पणिःप
णनाद्वणिक्पण्यं नेनेक्ति। अपां बिलमपिहितं यदासीत्। बिलं
भरं भवति बिभर्त्तेर्वृत्रं जघन्वानपववार तद्वृत्रो वृणोतेर्वा व
र्त्ततेर्वा वर्द्धतेर्वा यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते यद
वर्त्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते यदवर्द्धत तद्वृत्रस्य वृत्र
त्वमिति विज्ञायते। पंचमः पादः। रात्रिनामान्युत्तराणि त्रयोविं
शती रात्रिः कस्मात्प्ररमयति भूतानि नक्तंचारीण्युपरमयती

तराणि ध्रुवीकरोति रातेर्वा स्याद्दानकर्मणः प्रदीयंतेऽस्यामवश्या
या उषोनामान्युत्तराणि षोडश उषाः कस्मादुच्छतीति सत्या रात्रे
रपरः कालस्तस्या एषा भवति ॥२६॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चि
त्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितुः सवायँ एवा रात्र्यु
षसे योनिमारैक्। इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं
प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रा
त्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानं स्त्रीयोनिरभियु

तएनांगर्भस्तस्याएषापराभवति ॥ २७ ॥ रुशाद्वत्सारुशतीश्वेत्यागादा
रैगुकृष्णासदनान्यस्याः ॥ समानबंधूअमृतेअनूचीद्यावावर्णंच
रतआमिनाने ॥ रुशद्वत्सासूर्यवत्सारुशादितिवर्णनामरोचते
र्ज्वलतिकर्मणः सूर्यमस्यावत्समाहसाहचर्याद्रसहरणाद्वा ॥ रु
शतीश्वेत्यागात् ॥ श्वेत्याश्वेततेररिचत्कृष्णासदनान्यस्याः कृष्ण
वर्णारात्रिः कृष्णंकृष्यतेर्निकृष्टोवर्णोथैनेसंस्तौतिसमानबं
धूसमानबंधनेअमृतेअमरणधर्माणावनूचीइतीतरेतरम ॥ २७

भिप्रेत्यद्यावावर्णंचरतस्तेएवद्यावौद्योतनादपिवाद्यावाचरतस्तयाचर
तइतिस्यादामिनानेअन्योन्यस्याध्यात्मंकुर्वाणेअहर्नामान्युत्तरा
णिद्वादशाहः कस्मादुपाहरंत्यस्मिन्कर्माणितस्यैषनिपातोभव
तिविश्वानरीयायामृचि ॥ २८ ॥ अहश्चकृष्णमहरर्जुनंचविवर्त्ते
तेरजसीवेद्याभिः ॥ विश्वानरोजायमानोनराजावातिरज्योति
षाग्निस्तमांसि ॥ अहश्चकृष्णंरात्रिः शुक्लंचाहरर्जुनंविवर्त्तेतेर
जसीवेद्याभिर्वेदितव्याभिः प्रवृत्तिभिर्वैश्वानरोजायमानइवोद्य

न्नादित्यःसर्वेषांज्योतिषांराजावाहंनग्निर्ज्योतिषातमांसिमघनामान्यु
त्तराणित्रिंशन्मेघंकस्मान्मेहयतीतिसतआउपरउपलइत्येताभ्यां
साधारणानिपर्वतनामभिरुपरउपलोमेघोभवत्युपरमंतेस्मिन्न
भ्राण्युपरताआपइतिवातेषामेषाभवति ॥ २९ ॥ देवानांमानेप्रथमा
अतिष्ठन्कृंतत्रादेषामुपराउदायन् ॥ त्रयस्तपंतिपृथिवीमनूपा
द्वाबृबूकंवहतःपुरीषं । देवानांनिर्माणेप्रथमाअतिष्ठन्माध्यम
कादेवगणाःप्रथमइतिमुख्यनामप्रतमोभवतिविकर्त्तनेनमेघा

॥ २८ ॥

नामुदकंजायते ॥ त्रयस्तपंतिपृथिवीमनूपाः पर्जन्योवायुरादित्यः
शीतोष्मवर्षैरोषधीःपाचयंत्यनूपाअनुवपंतिलोकान्स्वेनस्वेन
कर्मणायमपीतरोनूपएतस्मादेवानूप्यतउदकेनापिवान्वावि
तिस्याद्यथाप्रागिति ॥ तस्यानूपइतिस्याद्यथाप्राचीनमिति ॥ द्वाबृ
बूकंवहतःपुरीषं ॥ वाय्वादित्याउदकंबृबूकमित्युदकनामब्रवी
तेःशब्दकर्मणोभ्रंशतेर्वापुरीषंपृणातेःपूरयतेर्वा ॥ ३० ॥ षष्ठःपादः
वाङ्नामान्युत्तराणिसप्तपंचाशद्वाक्कस्माद्वचेस्तत्रसरस्वतीत्येत

स्यनदीवद्देवतावच्चनिगमाभवंतितद्यद्देवतावदुपरिष्टात्तद्व्याख्या
स्यामोथैतंनदीवत्॥२४॥इयंशुष्मेभिर्बिसखाइवारुजत्सानुगिरी
णांतविषेभिरूर्मिभिः।पारावतघ्नीमवसेसुवृक्तिभिःसरस्वतीमा
विवासेमधीतिभिः॥इयंशुष्मैःशोषणैःशुष्ममितिबलनामशोष
यतीतिसतोबिसंबिस्यतेर्भेदनकर्मणोवृद्धिकर्मणोवासानुसमु
छ्रितंभवतिसमुंनुन्नमितिवामहद्भिरूर्मिभिःपारावतघ्नीपारावा
रघातिनींपारं^भवत्यवारमवरमवनायसुप्रवृत्ताभिस्तुतिभिःस
परं

२९

रस्वतींकर्मभिःपरिचरेमोदकनामान्युत्तराण्येकशतमुदकंकस्मादु
नत्तीतिसतोनदीनामान्युत्तराणिसप्तत्रिंशन्नद्यःकस्मान्नदनाभ
वंतिशब्दवत्योबहुलमासांनैघंटुकंवृत्तमाश्चर्यमिवप्राधान्येनत
त्रेतिहासमाचक्षतेविश्वामित्रऋषिःसुदासःपैजवनस्यपुरोहितो
बभूवविश्वामित्रःसर्वमित्रःसर्वंसंसृतंसुदाःकल्याणदानःपैज
वनःपिजवनस्यपुत्रःपिजवनःपुनस्पर्द्धनीयजवोवामिश्रीभावग
तिर्वासवित्तंगृहीत्वाविपाट्छुतुद्र्योःसंभेदमाययावनुययुरितरे

घा से

सविश्वामित्रोनदीस्तुष्टावगाधाभवतेत्यपिद्विवदपिबहुवत्तद्यद्द्विवदु
परिष्टात्तद्व्याख्यास्यामोथैतद्बहुवत्॥२२॥रमध्वंमेवचसेसोम्यायऋताव
रीरुपमुहूर्त्तमेवैः॥प्रसिंधुमछाबृहतीमनीषावस्युरह्वेकुशिकस्य
सूनुः॥उपरमध्वंमेवचसेसोम्यायसोमसंपादिनऋतावरीर्ऋत
वत्यऋतमित्युदकनामप्रत्यृतंभवतिमुहूर्त्तमेवैरयनैरवनै
र्वामुहूर्त्तोमुहुर्ऋतुर्ऋतुरर्तेर्गतिकर्मणोमुहुर्मूढइवकालोयाव
दभीक्ष्णंचेत्यभीक्ष्णमभिक्षणंभवतिक्षणःक्षणोतेःप्रक्ष्णुतःका

॥३०

य

लःकालःकालयतेर्गतिकर्मणःप्राभिह्वयामिसिंधुंबृहत्यामहत्याम
नीषयामनसइषयास्तुत्याप्रज्ञयावावनायकुशिकस्यसूनुःकुशि
कोराजाबभूवक्रोशतेःशब्दकर्मणःक्रंशतेर्वास्यात्प्रकाशय
तिकर्मणःसाधुविक्रोशयितार्थानामितिवानद्यःप्रत्यूचुः॥२३॥
इंद्रोअस्माँअरदद्वज्रबाहुरपाहन्वृत्रंपरिधिंनदीनाम्॥देवोनय
त्सवितासुपाणिस्तस्यवयंप्रसवेयामउर्वीः॥इंद्रोअस्मानरद
द्वज्रबाहुरदतिःखनतिकर्मापाहन्वृत्रंपरिधिंनदीनामितिव्या

खात्तं ॥ देवोनयस्सविता सुपाणिः ॥ कल्याणपाणिःपाणिःपणायातः
पूजाकर्मणःप्रगृह्यपाणीदवान्पूजयंति ॥ तस्यवयंप्रसावयामउ
वीः ॥ उर्व्यऊर्णोत्तर्वृणोत्तेरित्यौर्णवानःप्रत्याखायांततआबभू
वुः ॥२४॥ आतकारोशृणवामावचांसियायाथदूरादनसाराथ
न ॥ नितेनंसिपीप्यानेवयोषामर्यायवकन्याशश्वचिते ॥ आश्र
णवामातकारोवचनानियाहिदूरादनसाचरथेनचनिनमाम
तेपाययमानेवयोषापुत्रंमर्यायेवकन्यापरिष्वजनायानिनमा

इतिवाश्वनामान्युत्तराणिषड्विंशतिस्तेषामष्टाउत्तराणिबहुवदश्वः
कस्मादश्नुतेध्वानंमहाशनोभवतीतिवातत्रदधिक्राइत्येतद्दध
क्रामतीतिवादधत्क्रंदतीतिवादधदाकारीभवतीतिवातस्याश्व
वद्देवतावच्चनिगमाभवंतितद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्या
मोथैतदश्ववत् ॥२५॥ उतस्यवाजीक्षिपणिंतुरण्यतिग्रीवायांब
द्धोअपिकक्षआसनि ॥ क्रतुंदधिक्राअनुसंतवीत्वत्पथामंकांस्य
न्वापनीफणत ॥ अपिसवाजीवेजनवान्क्षेपणमनुतूर्णमश्नुतेध्वा

नंग्रीवायांबद्धोग्रीवागिरतेर्वागृणातेर्वागृह्णातेर्वापिकक्ष्ये आस
नीतिव्याख्यातं॥ क्रतुंदधिक्राः कर्मवाप्रज्ञांवा॥ अनुसंतवीत्व
त्॥ तनोतेःपूर्वयाप्रकृत्यानिगमः पथामंकांसिपथांकुटिलानि
पंथाःपततेर्वापद्यतेर्वापंथतेर्वाअंकोंचतेरापनीफणदितिफणते
श्चर्करीतवृत्तंदशोत्तराण्यादिष्टोपयोजनानीत्याचक्षतेसाहच
र्यज्ञानाय ज्वलति कर्माण उत्तरेधातवएकादशशतावंत्येवोत्तरा
णिज्वलतोनामधेयानिनामधेयानि ॥२६॥ इतिद्वितीयोध्यायः
समाप्तः॥ ॥उँकर्मनामान्युत्तराणिषड्विंशतिः कर्मकस्मात्क्रियत ॥२२॥

तइतिसातापत्यनामान्युत्तराणिपंचदशापत्यंकस्मादपततंभवति
नानेनपततीतिवातद्यथाजनयितुःप्र जिवमर्थीयस्त्वाउदा
हरिष्यामः॥१॥ परिषद्यंह्यरणस्यरेक्णोनित्यस्यरायःपतयःस्याम
नशेषोअग्नेअन्यजातमस्त्याचे तानस्यमापथोविदुदुक्षः॥ परिहर्त्त
व्यंहिनोपसर्त्तव्यमरणस्यरेक्णोरणःपार्योभवतिरेक्णइतिधननाम
रिच्यतेप्रयतोनित्यस्यरायःपतयःस्याम॥ पित्र्यस्येवधनस्य॥ नशेषो
अग्नेअन्यजातमस्ति॥ शेषइत्यपत्यनामशिष्यतेप्रयतोचेतयमा

नस्यतत्प्रमत्तस्यभवतिमानःपाथाविदूदुषइतितास्यात्तराभूयसेनि
र्वचनाय॥२॥ नहिग्रभायारणःसुशेवोन्योदर्योमनसामंतवाउ॥ अ
धाचिदोकःपुनरित्सएत्यानोवाज्यभीषालेतुनव्यः॥ नहिग्रहीतव्यो
अरणःसुसुखतमोप्यन्योदर्योमनसापिनमंतव्याममायमित्यथसउ
कःपुनरेवतदेतियतआगतोनवात्याकइतिनिवासनामोच्यतएतु
नोवाजीवजनवानभिषहमाणःसपत्नान्नवजातःसएवपुत्रइत्यथै
तांदुहितृदायाद्यउदाहरंतिपुत्रदायाद्यइत्येक॥३॥ शासद्वह्निर्दुहि

तुर्नप्त्यंगाद्विद्वाँऋतस्यदीधितिंसपर्यन्॥ पितायत्रदुहितुःसेकमृं
जंसंशग्म्येनमनसादधन्वे॥ प्रशास्तिवोढासंतानकर्मणेदुहि
तुःपुत्रभावंदुहितादुर्हितादूरेहितादोग्धेर्वानप्तारमुपागमद्दौहि
त्रंपौत्रमितिविद्वान्प्रजननयज्ञस्यरेतसोवाअंगादंगात्संभूत
स्यहृदयादधिजातस्यमातरिप्रत्यृतस्यविधानंपूजयंनविशे
षेणमिथुनाःपुत्रादायादाइतितदेतदृक्श्लोकाभ्यामभ्युक्तं॥४॥

अंगादंगात्संभवसिहृदयादधिजायसे ॥ आत्मावैपुत्रनामासि
सजीवशरदःशतमित्यविशेषेणपुत्राणांदायोभवतिधर्मतः ॥ मि
थुनानांविसर्गादौमनुःस्वायंभुवोब्रवीत् ॥ नदुहितरइत्येके
तस्मात्पुमांदायादोऽदायादास्त्रीतिविज्ञायतेतस्मात्स्त्रियंजातां
परास्यंतिनपुमांसमितिचस्त्रीणांदानविक्रयातिसर्गाविद्यंते
नपुंसःपुंसोऽपीत्येकेशौनःशेपेदर्शनात् ॥ अभ्रातृमतीवादइ
त्यपरं ॥ अभ्रातरइवयोषास्तिष्ठंतिहतवर्त्मनः ॥ अभ्रातृकाइव

योषास्तिष्ठंतिसंतानकर्मणेपिंडदानायहतवर्त्मानइत्यभ्रातृकाया
अनिर्वाहऔपमिकस्तस्योत्तराभूयसेनिर्वचनाय ५ अभ्राते
वपुंसएतिप्रतीचीगर्त्तारुगिवसनयेधनानां ॥ जायेवपत्यउश
तीसुवासाउषाहस्रेवनिरिणीतेअप्सः ॥ अभ्रातृकेवपुंसःपि
तॄनेत्यभिमुखीसंतानकर्मणेपिंडदानायनपतिंगर्त्तारोहिणीव
धनलाभायदाक्षिणाजीगर्त्तःसभास्थाणुर्गृणातेःसत्यसं

गरोभवतितंतत्रयापुत्रायापतिकासारोहतितांतत्राक्षेणाघ्नंति
सारिक्थंलभतेश्मशानसंचयोपिगर्त्तउच्यतेगुरतेरपगूर्णोभ
वतिश्मशानंश्मशयनंश्मशरीरंशरीरंशृणातेःशम्नातेर्वाश्मश्रु
लोमश्मनिश्रितंभवतिलोमलुनातेर्वालीयतेर्वानोपरस्यावि
ष्कुर्याद्यदुपरस्याविष्कुर्याद्गर्त्तेष्ठास्यात्प्रमायुकोयजमानइत्य
पिनिगमोभवतिरथोपिगर्त्तउच्यतेगृणातेःस्तुतिकर्मणः।स्तु

ततमंयानं॥आरोहथोवरुणमित्रगर्त्तमित्यपिनिगमोभवति॥जाये
वपत्येकामयमानासुवासाऋतुकालेषुषाहसानवदंतान्विवृणु
तरूपाणीतिचतस्य उपमानाभ्रात्रीमुपयच्छततोकंह्यस्यत
द्भवतीत्यभ्रातृकाया उपयमनप्रतिषेधः प्रत्यक्षःपितुश्चपुत्रभा
वःपितायत्रदुहितुरप्रत्तायारेतःसेकंप्रार्जयतिसंदधात्यात्मा
नंसंगमनमनास्तत्यार्थेतांजाम्यारिक्थप्रतिषेधउदाहरंति

ज्येष्ठंपुत्रिकायाइत्येके॥६॥नजामयेतान्वोरिक्थमारैक्चकारग
र्भंसनितुर्निधानं॥ यदीमातरोजनयंतवह्निमन्यःकर्त्तासुकृतो
रन्यऋंधन्॥ नजामयेभगिन्यैजामिरन्येस्यांजनयंत्यजिनम
पत्यंजमातर्वास्याऽतिकर्मणोनिर्गमनप्रायाभवतितान्वआ
त्मजःपुत्रोरिक्थंप्रारिचत्प्रादाच्चकारैनांगर्भनिधानींसनितुर्ह
स्तग्राहस्य॥ यदीमातरोजनयंतवह्निं॥ पुत्रमह्निंचस्त्रियमन्य

व१

३५
३६

तरःसंतानकर्त्ताभवतिपुमादायादोन्यतरोर्द्धयित्वाजामिःप्रदी
यतेपरस्मै॥७॥प्रथमःपादः॥ ॥मनुष्यनामान्युत्तराणिपंचविं
शति॥ मनुष्याःकस्मान्मत्वाकर्माणिसीव्यंतिमनस्यमानेनसृ
ष्टामनस्यतिःपुनर्मनस्वीभावेमनोरपत्यंमनुषोवातत्रपंचज
नाइत्येतस्यनिगमाभवंति॥८॥तदद्यवाचःप्रथमंमसीययेना
सुरांअभिदेवाअसाम॥ऊर्जादउतयज्ञियासःपंचजनाम(

महोत्रंजुषध्वं॥तदद्यवाचःपरमंमंसीययेनासुरानभिभवेमदे
वाअसुराअसुरताःस्थानेष्वस्ताःस्थानेभ्यइतिवापिवासुरितिप्रा
णनामास्तःशरीरेभवतितेनतद्वंतःसोर्देवानसृजततत्सुरा
णांसुरत्वमसोरसुरानसृजततदसुराणामसुरत्वमितिविज्ञा
यते॥ऊर्जादउतयज्ञियासः॥अन्नादाश्चयज्ञियाश्चोर्गित्यं(
ननामार्जयतीतिसतःपक्वंसुप्रवृक्णमितिवा॥पंचजनाम(

महोत्रंजुषध्वं॥गंधर्वाःपितरोदेवाअसुरारक्षांसीत्येकेचत्वारोव
र्णानिषादःपंचमइत्यौपमन्यवोनिषादःकस्मान्निःषंणमस्मिन्पा
पकमितिनिरुक्ताः॥यत्पांचजन्यया विशा॥पंचजनीनयाविशा
पंचपृक्तासंख्यास्त्रीपुन्नपुंसकेष्वविशिष्टाबाहुनामान्युत्तराणि
द्वादशबाहूकस्मात्प्रबाधतआभ्यांकर्माण्यंगुलिनामान्युत्तरा
णिद्वाविंशतिरंगुलयःकस्मादग्रगामिन्योभवंतीतिवाग्रगालि(

न्यो भवंतीति वाग्रकारिण्यो भवंतीति वांकना भवंतीति वांजना भ
वंतीति वापि वाभ्यंजनादेव सुस्तासामेषा भवति॥ ऐ दशावनि
भ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः॥ दशाभीशुभ्यो अ
र्चताजरेभ्यो दशधुरो दशयुक्ता वहद्भ्यः॥ अवनयोंगुलयो भवं
त्यवंति कर्माणि कक्ष्याः प्रकाशयंति कर्माणि योक्त्राणि योजनानी
ति व्याख्यातम् अभीशवो ऽभ्यश्नुवते कर्माणि॥ दश धुरो दश युक्ता वह ॥३८

द्भ्यः॥ धूर्धूर्वतेर्वधकर्मण इयमपीतरा धूरेतस्मादेव विहन्ति वहं
धारयतेर्वा कान्तिकर्मण उत्तरे धातवोऽष्टादशान्ननामान्युत्तरा
ण्यष्टाविंशतिरन्नं कस्मादानतं भूतेभ्योत्तेर्वात्तिकर्मण उत्तरे धा
तवो दश बलनामान्युत्तराण्यष्टाविंशतिर्बलं कस्माद्बलं भरं भ
वति बिभर्त्तेर्धननामान्युत्तराण्यष्टाविंशतिरेव धनं कस्माद्धिनो
तीति सतो गोनामान्युत्तराणि नव क्रुध्यति कर्मण उत्तरे धात

वोदशक्रोधनामान्युत्तराण्येकादशगतिकर्माणिउत्तरक्षतवोद्वा
विंशंशतं क्षिप्रनामान्युत्तराणिषड्विंशतिःक्षिप्रंकस्मात्संक्षिप्तो
विकर्षौतिकनामान्युत्तराण्येकादशांतिकंकस्मादानीतंभवति(
संग्रामनामान्युत्तराणिषट्चत्वारिंशत्संग्रामःकस्मात्संगमनाद्वासं
गरणाद्वासंगतौग्रामावितिवातत्रखलइत्येतस्यनिगमाभवंति
॥१०॥ अभी ३ दमेकमेकोअस्मिनिःष्षाळभीद्वाकिमुत्रयःकरंति
खलेनपुर्षान्प्रतिहन्मिभूरिकिंमांनिंदंतिशत्रवोनिंद्राः॥अनि

न्नवामीदमेकमेकोअस्मिनिःषहमाणःसपत्नानभिन्नवामिंद्वा
किंमात्रयःकुर्वंत्येकइतासंख्याद्वाडुततरासंख्यात्रयस्तीर्ण(
तमासंख्याचत्वारश्चलिततमासंख्याष्टावश्नोतेर्नवनवननी
यानावाप्तावादशदस्तादृष्टार्थावाविंशतिर्द्विर्दशतःशतंदशद
शतःसहस्रंसहस्वदयुतंप्रयुतंनियुतंतत्तदभ्यस्तमर्बुदोमे
घोभवत्यरणमंबुतद्वोंबुमद्भातीतिवांबुमद्भवतीतिवासय

थामहान्चहुर्नवति वर्षस्तदिवार्बुदं ॥ खलेनपर्षान्प्रतिहन्मिभू
रि ॥ खलइवपर्षान्प्रतिहन्मिभूरि खलइतिसंयामनामखल
तेर्वास्खलतेर्वायमपीतरः खलएतस्मादेवसमास्कंनो नवति ॥
॥ किंमानिंदंतिशत्रवोनिंद्राः ॥ यइंद्रंनविदुरिंद्रोह्यहमस्मानिंद्रा
इतरइतिवाव्याप्तिकर्माणि उत्तरेधातवोदशातत्राद्वनामनीआ
क्षाणआश्नुवानआपानआप्लुवानो वधकर्माणि उत्तरेधातवस्त्र
यस्त्रिंशत्तत्रवियातइत्येतद्वियातयतइतिवावियातयेतिवा ॥

॥ आखंडलप्रहूयसे ॥ आखंडयितः ॥ तळिदित्यंतिकवधयोः संस्
ष्टकर्मताळयतीतिसतः ॥ ११ त्वयावयंसुवृधाब्रह्मणस्पतेस्पार्हीव
सुमनुष्याददीमहि ॥ यानोदूरेतळितोयाअरातयोभिसंतिजंभया
ताअनप्नसः ॥ त्वयावयंसुवर्द्धयित्राब्रह्मणस्पतेस्पृहणीयानिवसू
निमनुष्येभ्यआददीमहियाश्चनोदूरेतळितोयाश्चांतिकेरातयोदा
नकर्माणोवादानप्रज्ञावाजंभयताअनप्नसोप्नइतिरूपनामाप्नो

तीतिस्सतोविघ्नकृतःलिङ्गवतीतिशाकपूणिः साह्यवतासयतिदूरा
ह्यवदृश्यतेपिविदमंतिकनामैवाभिप्रेतंस्यात्॥ दूरेचित्संतलिदि
वातिरोचसे॥ दूरेपिसंनंतिकइवसंदृश्यसइतिवज्रनामान्यु
त्तराण्यष्टादशवज्रः कस्माद्वर्जयतीतिसतस्तत्रकुत्सइत्येत
त्कृंततेर्ऋषिःकुत्सोभवतिकर्तास्तोमानामित्यौपमन्यवोथाप्य
स्यवधकर्मैवभवतितत्सखइंद्रःशुष्णंजघानेत्यैश्वर्यकर्मा

णःउत्तरेधातवश्चत्वारईश्वरनामान्युत्तराणिचत्वारितत्रेनइत्ये
तत्सनितऐश्वर्येणेतिवासनितमनेनैश्वर्यमितिवा॥ १२ यत्रा
सुपर्णाअमृतस्यभागमनिमेषंविदथाभिस्वरंति॥ इनोविश्व
स्यभुवनस्यगोपाःसमाधीरःपाकमत्राविवेश॥ यत्रसुपतना
आदित्यरश्मयोमृतस्यभागमुदकस्यानिमिषंनोवेदनेनाभि
स्वरंतीतिवाभिप्रयंतीतिवेश्वरःसर्वेषांभूतानांगोपायिता

दित्यः समा धीरः पाकमत्रा विवेशेति धीरो धीमान्पाकः पक्तव्यो
भवति विपक्वप्रज्ञ आदित्य इत्युपनिषद्वर्णो भवतीत्यधिदैव
तमथाध्यात्मं यत्र सुपतनानींद्रियाण्यमृतस्य भागं ज्ञानस्यानि
मिषंति वेदनेनाभिस्वरंतीति वाभिप्रयंतीतीश्वरः सर्वेषा
मिंद्रियाणां गोपायितात्मा समा धीरः पाकमत्रा विवेशेति धीरो
धीमान्पाकः पक्तव्यो भवति विपक्वप्रज्ञ आत्मेत्यात्मगतिमा

चष्टे ॥ द्वितीयः पादः ॥२॥ बहुनामान्युत्तराणि द्वादश बहु कस्मा
१३
त्प्रभवतीति सतो ह्रस्वनामान्युत्तराण्येकादश ह्रस्वो ह्रसते
र्महन्नामान्युत्तराणि पंचविंशतिर्महान्कस्मान्मानेनान्यांजह
तीति शाकपूणिर्महनीयो भवतीति वा तत्र ववक्षिथ विवक्षस
इत्येते वक्तेर्वा वहतेर्वा साभ्यासाद्गृहनामान्युत्तराणि द्वाविंश
तिर्गृहाः कस्माद्गृह्णंतीति सतां परिचरणकर्माण्युत्तरे धात

वोदशसुखनामान्युत्तराणिविंशतिःसुखंकस्मात्सुहितंखेभ्यः
खंपुनःखनतेरूपनामान्युत्तराणिषोडशरूपंरोचतेःप्रशस्य
नामान्युत्तराणिदशप्रज्ञानामान्युत्तराण्येकादशसत्यनामान्यु
त्तराणिषट्सत्यंकस्मात्सत्सुतायतेसत्प्रभवंतीतिवा ॥ १४ ॥ अष्टा
उत्तराणिपदानिपश्यतिकर्माण्याधातवश्चायतिप्रभृतीनि(
चनामान्यामिश्राणिनवोत्तराणिपदानिसर्वपदसमाम्नानाया

नव ३

॥ ४३

थातउपमायदतत्तत्सदृशमितिगार्ग्यस्तदासांकर्मज्यायसावा
गुणेनप्रख्याततमेनवाकनीयांसंवाप्रख्यातंवोपमिमीते
थापिकनीयसाज्यायांसं ॥ १५ ॥ तनूत्यजेवतस्करावनर्गूर
शनाभिर्दशभिरभ्यधीतां ॥ तनूत्यक्तावनर्गूवनगा
मिनावग्निमंथनौबाहूतस्कराभ्यामुपमिमीतेतस्करस्त
त्करोतियत्पापकमितिनैरुक्तास्तनोतेर्वास्यात्संततकर्मा

नवत्यहोरात्रकर्मा वा रश्मानां निर्देशानिरभ्यधीतामभ्यधातोज्या
यांस्तत्र गुणोऽभिप्रेतः ॥ १६ ॥ कुहस्विद्दोषा कुह वस्तोरश्विना कुहा
भिपित्वं करतः कुहोषतुः ॥ को वां शयुत्रा विधवेव देवरं मर्यं न यो
षा कृणुते सधस्थ आ ॥ क्वस्विद्रात्रौ भवथः क्व दिवा क्वाभिप्राप्तं
कुरुथः क्व वसथः को वां शयने विधवेव देवरं विधवा विधातृका
भवति विधवनाद्वा विधावनाद्वेति चर्मशिरा अपि वा धव इति म
नुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्मा मर्यो मनुष्यो मरण

धर्मा योषा यौतेः कुरुते सधस्थानेथ निपाताः पुरस्तादेव व्याख्या
ता यथेति कर्मोपमा ॥ यथा वातो यथा वनं यथा समुद्र एजति ॥ भ्रा
जन्तो अग्नयो यथा ॥ आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा
आत्मा अततेर्वाप्तेर्वापि वाप्त इव स्याद्यावद्व्याप्तिभूत इति ॥ अग्निर्न
ये भ्राजसा रुक्मवक्षसः ॥ अग्निरिव ये भ्राजस्वन्तो रुक्मवक्षसः ॥
१७ ॥ चतुरश्चिद्ददमानाद्बिभीयादानिधातोः ॥ न दुरुक्ताय स्पृहये
त् ॥ चतुरश्चिद्धारयत इति तद्यथा कितवाद्बिभीयादेवमेव दुरुक्ता

द्विनीयान्नदुरुक्तायस्पृहयेत्॥ कदाचिदाइत्याकारउपसर्गःपु
रस्तादेवव्याख्यातोथाप्युपमार्थेदृश्यते॥ जारआभगं॥ जारइ
वभगमादित्योत्रजार उच्यतेरात्रेर्जरयितासएवभासांतथापि
निगमोभवति॥ स्वसुर्जारःशृणोतुनइत्युषसमस्यस्वसारमाह
साहचर्याद्रसहरणाद्वापित्वयंमनुष्यजारएवाभिप्रेतःस्यात्स्त्री
भगस्तथास्याद्भजतेर्मेषइतिभूतोपमा॥ मेषोभूतो॥ ३॥ भियंनयः॥
मेषोमिषतेस्तथापशुःपश्यतेरग्निरितिरूपोपमा॥ हिरण्यरूपःस

हिरण्यसंदृगपांनपात्सेदुहिरण्यवर्णः॥ हिरण्यवर्णस्येवास्यरूपंथा
इतिच॥ तंप्रत्नथापूर्वथाविश्वथेमथा॥ प्रत्नइवपूर्वइवविश्वइवे
मइवेत्ययमेततरोमुष्मादसावस्ततरोस्मादमुथायथासावितिव्या
ख्यातंवदितिसिद्धोपमा॥ ब्राह्मणवद्वृषलवत्॥ ब्राह्मणाइववृष
लाइवेति॥ १८॥ प्रियमेधवदत्रिवज्जातवेदोविरूपवत्॥ अं
गिरस्वन्महिव्रतप्रस्कण्वस्यश्रुधीहवं॥ प्रियमेधप्रियास्यमेधा
यथैतेषामृषीणामेवंप्रस्कण्वस्यशृणुह्वानंप्रस्कण्वःकण्वस्यपु

त्रः कएवप्रज्ञवोयथाप्रायमर्चिषिभृगुः संबभूवभृगुर्भृज्यमानो
न देहेंगारेष्वंगिराअंगाराअंकनाअत्रैवतृतीयमृछातत्यूचुस्त
स्मादत्रिर्नत्रयइतिविखननाद्वैखानसोभरणाद्भारद्वाजोविरू
पोनानारूपोमहिव्रतोमहाव्रतइति ॥१९॥ तृतीयःपादः ॥ ॥ अथलु
प्तोपमान्यर्थोपमानीत्याचक्षते सिंहोव्याघ्रइतिपूजायांश्वाकाकइ
तिकुत्सायांकाकइतिशब्दानुकृतिस्तदिदंशकुनिषुबहुलंनशब्दा
नुकृतिर्विद्यतइत्यौपमन्यवःकाकोपकालइतव्योभवतीतितित्तिरि
यि

त्रि

स्तरणात्तिलमात्रचित्रइतिवाकपिंजलःकपिरिवजीर्णःक
पिरिवजवतईषत्पिंगलोवाकमनीयंशब्दंपिंजयतीतिवाश्वा
शुयायीशवतेर्वास्याद्गतिकर्मणःश्वसितेर्वासिंहःसहनाद्धिंसे
र्वाविपरीतस्यसंपूर्वस्यवाहंतेःसंहायहंतीतिवाव्याघ्रोव्याघ्रा
णाद्व्यादायहंतीतिवा ॥२०॥ अर्चतिकर्माणउत्तरेधातवश्च
तुश्चत्वारिंशन्मेधाविनामान्युत्तराणिचतुर्विंशतिर्मेधावीक
स्मान्मेधयातद्वान्भवतिमेधामतौधीयतेस्तोतृनामान्युत्तराणि

त्रयोदशयज्ञनामान्युत्तराणिपंचदशयज्ञः कस्मात्प्रख्यातंय
जतिकर्मेतिनैरुक्तायाच्ञोभवतीतिवायजुरुन्नोभवतीति
वाबहुकृष्णाजिनइत्यौपमन्यवायजूंष्येनंनयंतीतिवार्त्विङ्ना
मान्युत्तराण्यष्टावृत्विः कस्मादीरणऋग्यष्टाभवतीतिशाकपू
णिर्ऋतुयाजीभवतीतिवायाच्ञाकर्माणउत्तरेधातवः सप्तद
शदानकर्माणउत्तरेधातवोदशाध्येषणाकर्माणउत्तरेधात
वश्चत्वारः स्वपितिसस्तीतिद्वौस्वपितिकर्माणौकूपनामान्यु

त्तराणिचतुर्दशकूपः कस्मात्कुपानंभवतिकुप्यतेर्वास्तेननामान्युत्त
राणिचतुर्दशैवस्तेनः कस्मात्संस्त्यानमस्मिन्पापकमितिनैरुक्ता
निर्णीतांतर्हितनामधेयान्युत्तराणिषड्दूरनामान्युत्तराणिपंच
दूरंकस्माद्द्रुतंभवतिदुर्यंवापुराणनामान्युत्तराणिषट्पुराणं
कस्मात्पुरानवंभवतिनवनामान्युत्तराणिषळेवनवंकस्मादा
नीतंभवति॥२१॥द्विराउत्तराणिनामानिप्रपित्वेअभीकइत्यासंन
स्यप्रपित्वेप्राप्तेभीकेभ्यक्ते॥आपित्वेनः प्रपित्वेतूयमागहि॥अभी

केचित्तु लोककृदित्यपि निगमौ भवतः॥ दभ्रमर्भकमित्यल्पस्य॥ दभ्रं
दभ्नोतेः सुदंभं भवत्यर्भकमवहृतं भवति॥ उपोप मे परा मृश मा मे द
भ्राणि मन्यथाः॥ नमो महद्भ्यो नमो अर्भकेभ्य इत्यपि निगमौ भव
तः॥ तिरः सत इति प्राप्तस्य॥ तिरस्तीर्णं भवति॥ सतः संसृतं भव
ति॥ तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या॥ पात्रेव भिंदं[illegible] सत
एति रक्षस इत्यपि निगमौ भवतः॥ त्वो नेम इत्यर्द्धस्य॥ त्वोपततो
नेमोपनीतो॥ अर्द्धं हरतेर्विपरीताद्धारयतेर्वा स्यादुद्धृतं भवत्यृध्नो

त:॥ अ

तेर्वा स्यादृद्धतमो विभागः॥ पीयति त्वो अनु त्वो गृणाति॥ नेमे देवा
नेमे सुरा इत्यपि निगमौ भवतः॥ ऋक्षा स्तृभिरिति नक्षत्राणां न
क्षत्राणि नक्षतेर्गतिकर्मणो नेमानि क्षत्राणीति च ब्राह्मणम् ऋक्षा
उदीर्णानीव ख्यायंते॥ स्तृभिस्तीर्णानीव ख्यायंते॥ अमी य ऋ
क्षा निहितास उच्चा॥ पश्यंतो द्यामिव स्तृभिरित्यपि निगमौ भ
वतः॥ २२॥ वम्रीभिरुपजिह्विका इति सीमिकानां वम्र्यो वमना
सीमिकास्यमनादुपजिह्विका उपजिघ्र्यः॥ यदत्त्युपजिह्विका

ति॰ऊ

यद्वृत्रो अतिसर्पतीत्यपिनिगमोभवत्यूर्द्दरंकुदरमित्यावपनस्योद्द
रमुद्गीर्णंभवत्यूर्जेदीर्णंवा ॥ तमूर्द्दरंनपृणतायवेत्यपिनिगमो
भवति ॥ तमूर्द्दरमिवपूरयतियवेन कुदरंकृतदरंभवति ॥ समि
द्धोअंजन्कृदरंमतीनामित्यपिनिगमोभवति ॥ रंभःपिनाकमिति
दंडस्य ॥ रंभआरभंतएनं ॥ आत्वारंभंनजिव्रयोररभ्मेत्यपिनि
गमोभवत्यारभामहेत्वाजीर्णाइवदंडंपिनाकंप्रतिपिनष्ट्येनेन
कृत्तिवासाःपिनाकहस्तोऽवततधन्वेत्यपिनिगमोभवति ॥ २३ ॥

ने

ग्नास्
क्रान

॥

तै।न्ना

४९

मेनाग्नाइतिस्त्रीणांस्त्रियस्त्यायतेरपत्रपणकर्मणोमेनामानयंत्ये
नाग्नागच्छंत्येनाः ॥ अमेनांश्चिज्जनिवतश्चकर्थ ॥ ग्नास्त्वाकृंतंन
पसोतन्वतेनेत्यपिनिगमौभवतः ॥ शेपोवैतसइतिपुंस्प्रजनन
नस्य ॥ शेपःशपतेःस्पृशतिकर्मणोवैतसोवितस्तंभवति ॥ यस्या
मुशंतःप्रहरामशेपं ॥ त्रिःस्ममाह्नःश्नथयोवैतसेनेत्यपिनिगमौ
भवतः ॥ अथैनेत्युपदेशस्य ॥ अयातेअग्नेसमिधाविधेमेतिस्त्रि

याः॥ एना वो अग्निमितिनपुंसकस्य॥ एनापत्यातन्व १ संसृजस्वे
तिपुंसः॥ सिषक्ति सचतइतिसेवमानस्य॥ सनेः सिषक्तुयस्तुरः॥
सनेः सेवतांयस्तुरः॥ सचेस्वानः स्वस्तये॥ सेवेः स्वनः स्वस्तये॥
स्वस्तीत्यविनाशनामास्तिरभिपूजितःसुअस्तीतिभ्यसतेरेजत
इतिभयवेपनयोः॥ यस्यशुष्माद्रोदसीअभ्यसेतां॥ रेजेतेअग्नेपृ
थिवीमखेभ्यइत्यपिनिगमौभवतः॥ द्यावापृथिवीनामधेयान्यु
त्तराणिचतुर्विंशतिस्तयोरेषाभवति॥ २४॥ कतरापूर्वाकतराप

रायोः कथाजातेकवयःकोविवेद॥ विश्वंत्मनाबिभृतोयद्धनामवि
वर्तेतेअहनीचक्रियेव॥ कतरापूर्वाकतरापरैनयोः कथंजातेक
वयःकएनेविजानातिसर्वमात्मनाबिभृतोयद्धैनयोः कर्मविवर्त्ते
तेचैनयोरहनीअहोरात्रेचक्रयुक्तेइवेतिद्यावापृथिव्योर्महिमा
नमाचष्टआचष्टे॥ २५॥ इतितृतीयोध्यायः॥ एकार्थमनेकशब्दमित्ये
तदुक्तमथयान्यनेकार्थान्येकशब्दानितान्यतोनुक्रमिष्यामोनवगत
संस्कारांश्चनिगमांस्तदैकपदिकमित्याचक्षतेजहाजघानेत्यर्थः॥

१ कोन्नुमर्या अमिथितःसखासखायमब्रवीत् ॥ जहाको अस्मदीष
ते मर्याइतिमनुष्यनाममर्यादाभिधानंवास्यान्मर्यादामर्यादिनो
र्विभागोमेथतिराक्रोशकर्मापापकंजघानकमहंजानुकोअस्मद्भीतः
पलायतेनिधापाश्याभवतियंन्निधीयतेपाश्यापाशासमूहःपाशाः
पाशायतेर्विपाशनात् ॥ २ ॥ वयःसुपर्णाउपसेदुरिंद्रंप्रियमेधाऋ
षयोनाधमानाः ॥ अपध्वांतमूर्णुहिपूर्द्धिचक्षुर्मुमुग्ध्य१स्मान्निध
येवबद्धान् ॥ वयोवेर्बहुवचनंसुपतनाआदित्यरश्मयउपसेदु

रिंद्रंयाचमानाअपोर्णुह्याध्वस्तंचक्षुःचक्षुःख्यातेर्वाचष्टेर्वापू
र्द्धिपूरयदेहीतिवामुंचास्मान्पाशैरिवबद्धान्पार्श्वतःश्रोणितः
शितामतःपार्श्वंपर्शुमयमंगंभवतिपर्शुःस्पृशतेःसंस्पृष्टापृष्टदे
शंपृष्ठंस्पृशतेःसंस्पृष्टमंगैरंगमंगनादंचनाद्वाश्रोणिश्रोणतेर्ग
तिचलाकर्मणःश्रोणिश्चलतीवगछतोदोःशितामभवतिदो
र्द्रवतेर्योनिःशितामितिशाकपूणिर्विषितोभवतिश्यामतायकृ

त्तइतितैटीकिः श्यामंश्यायतेर्यत्किञ्चयथाकथाचकृत्यतेशितिमांस
तोमेदस्तइतिगालवः शितिः श्यतेर्मांसंमाननंवामानसंवाम
नोस्मिन्सीदतीतिवामेदोमेद्यतेः ॥३॥ यदिंद्रचित्रमेहनास्ति
त्वादातमद्रिवः ॥ राधस्तन्नोविदद्वसउभयाहस्त्याभर ॥
यदिंद्रचायनीयंमंहनीयंधनमस्तियन्मइहनास्तीतिवात्री
णिमध्यमानिपदानित्वयानस्तद्दातव्यमद्रिवन्नद्रिरादृणा

त्यनेनापिवात्तेस्यात्तेसोमादइतिहविज्ञायतेराधइतिधननाम
राध्नुवंत्यनेनतंनस्त्वंवित्तधनोभाभ्यांहस्ताभ्यामाहरोभौस
मुद्रौभवतोदमूनादममनावादानमनावादांतमनावापिवा
दमइतिगृहनामतन्मनास्यान्मनोमनोतेः ॥४॥ जुष्टोदमूनाअ
तिथिर्दुरोणइमंनोयज्ञमुपयाहिविद्वान् ॥ विश्वाअग्नेअभियुजो
विहत्याशत्रूयतामाभराभोजनानि ॥ अतिथिरभ्यतितोगृहान्

वत्सन्येति तिथिषुपरक्तंजानीति वागृहाणीति वादुरोणइतिगृह
नामदुरवा भवंतिदुस्तर्पाइमंनोयज्ञमुपयाहि विद्वान्सर्वा अग्ने
अभियुजोविहत्यशत्रूयतामाहरभोजनानिविहत्यान्येषांबला
निशत्रूणां भवतामाहरभोजनानीतिवाधनानीतिवामूषोमू
षिकाइत्यर्थोमूषिकाःपुनर्मुष्णातेर्मूषोप्येतस्मादेव ॥ ५ ॥ संमा
तपंत्यभितःसपत्नीरिवपर्शवः॥ मूषोनशिश्नाव्यदंतिमाध्यःस्तो

तारंतेशतक्रतोवित्तंमेअस्यरोदसी॥ संतपंतिमामभितःसप
त्न्यइवेमाःपर्शवः कूपपर्शवोमूषिकाइवास्नातानिसूत्राणि
व्यदंतिस्वांगाभिधानंवास्याच्छिश्नानिव्यदंतीतिसंतपंतिमा
ध्यःकामाःस्तोतारंतेशतक्रतोजानीतंमेस्यद्यावापृथिव्यावि
तित्रितंकूपेवहितमेतत्सूक्तंप्रतिबभौतत्रब्रह्मेतिहासमिश्र
मृङ्मिश्रंगाथामिश्रंभवतित्रितस्तीर्णतमोमेधयाबभूवापिवा

संख्यानामेवाभिप्रेतंस्यादेकतोद्वितस्त्रितइतित्रयोबभूवुः ॥६॥
इषिरेणतेमनसासुतस्यभक्षीमहिपित्र्यस्येवरायः ॥ सोमराज
न्प्रणआयूंषितारीरहानीवसूर्योवासराणि ॥ इषिरेणवेष
णेनवार्षणेनवातेमनसासुतस्यभक्षीमहिपित्र्यस्येवधनस्यप्र
वर्द्धयचनआयूंषिसोमराजन् ॥ अहानीवसूर्योवासराणि ॥ वासरा
णिवेसराणिविवासनानिगमनानीतिवाऊरुतनेत्यनर्थकाउप

जनाभवंतिकर्त्तनहंतनयातनेतिजठरमुदरंभवतिजग्धम
स्मिन्ध्रियतेधीयतेवा ॥७॥ मरुत्वाँइन्द्रवृषभोरणायपिबासोम
मनुष्वधंमदाय ॥ आसिंचस्वजठरेमध्वऊर्मिंत्वंराजासिप्रदि
वःसुतानां ॥ मरुत्वानिंद्रवान्वृषभोवर्षितापांरणायरमणी
यायसंग्रामायपिबसोममनुष्वधमन्वन्नंमदायमदनीयायजै
त्रायासिंचस्वजठरेमधुनऊर्मिंमधुसोममित्यौपमिकंमा

श्री

द्यतेरिदमपीतरन्मध्वेतस्मादेवचंराजासिपूर्वेष्वप्यहःसुसुता
नां ॥ ८ ॥ प्रथमः पादः ॥ तितउपरिपवनंभवतिततवद्वातुंनव
द्वातिलमात्रतुंनमितिवा ॥ ९ ॥ सक्तुमिवतितउनापुनंतोय
त्रधीरामनसावाचमक्रत ॥ अत्रासखायःसख्यानिजान
तेभद्रैषांलक्ष्मीर्निहिताधिवाचि ॥ सक्तुमिवपरिपवनेनपु
नंतःसक्तुःसचतेर्दुर्द्धावोभवतिकसतेर्वास्याद्विपरीतस्यवि

कसितोभवतियत्रधीरामनसावाचमकृषतप्रज्ञानंधीराः
प्रज्ञानवंतोध्यानवंतस्तत्रसखायःसख्यानिसंजानतेभ
द्रैषांलक्ष्मीर्निहिताधिवाचिभद्रंभगेनव्याख्यातंभजनीयं
भूतानामभिद्रवणीयंभवद्रमयतीतिवाभाजनवद्वाल
क्ष्मीर्लाभाद्वालक्षणाद्वालांछनाद्वालषतेर्वास्यात्प्रेप्साकर्म
णोलग्यतेर्वास्यादाश्लेषकर्मणोलज्जतेर्वास्यादश्लाघाक

र्मणाःशिप्रइत्युपरिष्टाद्व्याख्यास्यामः ॥१०॥ तत्सूर्यस्यदेवत्वंतन्महि
त्वंमध्याकर्तोर्विततंसंजभार ॥ यदेदयुक्तहरितःसधस्थादा
द्रात्रीवासस्तनुतेसिमस्मै ॥ तत्सूर्यस्यदेवत्वंतन्महित्वंमध्येय
त्कर्मणांक्रियमाणानांविततंसंह्रियतेयदासावयुक्तहरणा
नादित्यरश्मीन्हरितोश्वानितिवाथरात्रीवासस्तनुतेसिम व
स्मैवेसरमहरवयुवतीसर्वस्मादपिवोपमार्थेस्याद्रात्रीववा

सस्तनुतइतितथापिनिगमोभवति ॥ पुनःसमव्यद्विततंवयंती ॥
समनाऽसीत् ॥११॥ इंद्रेणसंहिदृक्षसेसंजग्मानोअबिभ्युषा
मंदूसमानवर्चसा ॥ इंद्रेणहिसंदृश्यसेसंगच्छमानोबिभ्युषा
गणेनमंदूमदिष्णूयुवांस्थोपिवामंदुनातेनेतिस्यात्समान
वर्चसेत्येतेनव्याख्यातं ॥१२॥ ईर्मांतासःसिलिकमध्यमासः
संशूरणासोदिव्यासोअत्याः ॥ हंसाइवश्रेणिशोयतंतेयदाक्षि

षुर्दिव्यमज्ममश्वाः॥ ईर्मांताःसमीरितांताःपृथ्वंतावासिलि
कमध्यमाःसंसृतमध्यमाःशीर्षमध्यमावापिवाशिरआदि
त्योभवतियदनुशेतेसर्वाणिभूतानिमध्येचैषांतिष्ठती
दमपीतरच्छिरएतस्मादेवसमाश्रितान्येतदिंद्रियाणिभ
वंतिसंशूरणासःशूरःशवतेर्गतिकर्मणोदिव्यादिविजाअ
त्याअतनाः॥ हंसाइवश्रेणिशोयतंतेहंसाहंतेर्घ्नंत्यध्वानंश्रे

णिश्रयतेःसमाश्रिताभवंतियदाक्षिषुर्यदापंदिव्यमज्ममाजि
नमाजिमश्वाअस्यादित्यस्तुतिरश्वस्यादित्यादश्वोनिस्तष्टइ
ति॥ सूरादश्वंवसवोनिरतष्टेत्यपिनिगमोभवति॥१२॥काय
मानोवनात्वंयन्मातॄरजगन्नपःनतत्तेअग्नेप्रमृषेनिवर्त्तनं
यद्दूरेसन्निहाभवः॥ कायमानश्चायमानःकामयमानइति
वावनानित्वंयन्मातॄरपोगमउपशाम्यन्नतत्तेअग्नेप्रमृष्य
तेनिवर्त्तनंदूरेयत्सन्निहभवसिजायमानः॥ लोधंनयंतिपशु

मन्यमानाः॥ लुब्धमृषिंनयंतिपशुंमन्यमानाः शीरंपावकशो
चिषं पावकदीप्तिं अनुशायिन मितिवाशिनमितिवा १४
कनीनकेववविद्रधेनवेद्रुपदे अर्भके बभ्रूयामेषुशोभेते
कनीनकेकन्यकेकन्याकमनीयाभवतिक्वेयंनेतव्येतिवाकन
तेर्वास्यात्कांतिकर्मणः कन्ययोरधिष्ठानप्रवचनानिसप्तम्या
एकवचनानीतिशाकपूणिर्वृद्धयोर्द्दौरुपाद्वोर्दारुदृणतेर्वा
दृणातेर्वातस्मादेवद्रु नवेनवजाते अर्भके अवृद्धेतेयथात

उला येतेमदाआहनसोविहायसस्तेरिंद्रचोदयदातवेमघं॥ उप५

दधिष्ठानेषुशोभेतेएवंबभ्रूयामेषुशोभेतेबभ्र्वोरश्मयोः संस्तव
इदंचमेदादिदंचमेदादित्यृषिः प्रसंख्यायाह॥ सुवास्त्वा अधितु
ग्वनि॥ सुवास्तुर्नदीतुग्वतीर्थंभवतित्तूर्णमेतदायंति॥ कुविंनं
संतेमरुतः पुनर्नः॥ पुनर्नोनवंतेमरुतोनसत इत्युपरिष्टाद्व्या
ख्यास्यामः॥ येतेमदाआहननवंतोवचनवंतस्तैरिंद्रचोदय
दानायमघं १५ उपोअदर्शिशुंध्युवोनवक्षोनोधाइवाविर
कृतप्रियाणि॥ अद्मसन्नसंसतोबोधयंतीशश्वत्तमागात्पुन

रेयुषीणां ॥ उपाश्र्वद र्शिशुंध्युवः शुंध्युरादित्यो भवति शोधना
त्तस्यैव वर्णो भासा ध्यूर्ल्ह इदमपीतरद्दृस एतस्मादेवा ध्यूर्ल्हं का
येशकुनिरपि शुंध्युरुच्यते शोधनादेवोदकचरो भवत्यापोपि
शुंध्युव उच्यंते शोधनादेव नोधा ऋषिर्भवति नवनं दधाति स
यथा स्तुत्या कामानाविष्कुरुत एवमुषा रूपाण्याविष्कुरुते अस्त
द्मसान्नं भवत्यद्मसादिनीति वाद्मसानिनीति वा ॥ ससतो बो
धयंती शश्वत्तमागात्पुनरेयुषीणां ॥ शश्वति कतमा गात्पुनरे

॥५९

युषीणां ॥ ते वाशीमंत इष्मिणः ॥ ईषणिन इति विषणिन इति वार्ष
णिन इति वा वाशीति वाङ्नाम वाश्यत इति सत्याः ॥ शंसा वाध्व
र्योप्रति मे गृणीहींद्राय वाहः कृणवाव जुष्टं ॥ अभिवहनस्तु
ति मन्निषवणप्रवादास्तुतिं मन्यंत ऐंद्री विवक्रास्पते परितकेम्य
इत्युपरिष्टाद्व्याख्यास्यामः ॥ १६ द्वितीयः पादः ॥ सुविते सुइते सू
ते सुगते प्रजायामिति वा ॥ सुविते मा धा इत्यपि निगमो भव

ति॥ दयतिरनेककर्मा। नवेनपूर्वंदयमानास्यामेत्युपदयाकर्मा॥
यएक इद्विदयतेवस्वितिदानकर्मा वाविभागकर्मावा॥ दुर्वर्तुर्भी
मोदयतेवनानीतिदहतिकर्मा॥ दुर्वर्तुर्दुर्वारः॥ विदद्वसुर्दयमा
नोविशत्रूनितिहिंसाकर्मा॥ इमेसुताइंदवःप्रातरित्वनास
जोषसापिबतमश्विनातान्॥ अहंहिवामूतयेवंदनायमांवाय
सोदोषादयमानोअबूबुधत्॥ दयमानइति॥ नूचिदितिनिपातःपुरा

णनवयोर्नूचेतिच॥ अद्याचिंनूचित्तदपोनदीनाम्॥ अद्य
चपुराचतदेवकर्मनदीनाम्॥ नूचपुराचसदनंरयीणां॥ अ
द्यचपुराचसदनंरयीणांरयिरितिधननामरातेर्दानकर्म
णः॥१७॥ विद्यामतस्यतेवयमकूपारस्यदावने॥ विद्यामत
स्यतेवयमकूपरस्यदानस्यादित्योप्यकूपारउच्यतेकूपारो
भवतिदूरपारःसमुद्रोप्यकूपारउच्यतेकूपारोभवतिम
हापारःकच्छपोप्यकूपारउच्यतेकूपारोनकूपमृच्छतीतिक

स्तुप्रजाः स्तुप्रजोभिरिति वा सुप्रायणा अस्मिन्यज्ञे विश्रयंतां

छपः कच्छं पाति कच्छेन पातीति वा कच्छेन पिबतीति वा कच्छः ख
च्छः खच्छदोयमपीतरो नदीकच्छ एतस्मादेव कमुदकं तेन छा
द्यते॥ शिशीते शृंगे रक्षसे विनिक्षे॥ निश्यति शृंगे रक्षसो विनि
क्षणाय रक्षो रक्षितव्यमस्माद्रहसि क्षणोतीति वा रात्रौ न
क्षत इति वा॥ अग्निः सुतुकः सुतुकेभिरश्वैः॥ सुतुकनः सु
तुकनैरिति वा सुप्रगमनाः॥ १८॥ देवा नो यथा सदमिद्वृ
धे असन्नप्रायुवो रक्षितारो दिवे दिवे॥ देवा नो यथा सदा

वर्द्धनाय स्युरप्रायुवोऽप्रमाद्यंतो रक्षितारश्चाहन्यहनि च्यवन
ऋषिर्भवति च्यावयिता स्तोमानां च्यवानमित्यप्यस्य निगमो
भवति॥ युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय त
क्षथुः॥ युवं च्यवनं सनयं पुराणं यथा रथं पुनर्युवानं चरणाय
ततक्षथुर्युवा प्रयौति कर्माणि तक्षतिः करोति कर्मा रजो र
जतेर्ज्योती रज उच्यत उदकं रज उच्यते लोका रजांस्युच्यं
ते असृगहनी रजसी उच्येते हरो हरतेर्ज्योतिर्हर उच्यत उद

केहर उच्यते लोकाहरा उच्यंते ॥ जुहुरे विचितयंतः ॥ जुह्विरे
विचेतयमाना व्यंत इ तेषेषानेक कर्मा ॥ पदं देवस्य नमसा व्यंतइ
ति पश्यपति कर्मा ॥ वीहि शूर पुरोलाशमिति खादति कर्मा ॥ वी
तं पातं पयस उस्त्रियीयाः ॥ अश्नीतं पिबतं पयस उस्त्रियाया
उस्त्रियेति गोनामोस्त्राविणोस्यां भोगाः ॥ वामिंद्र मतिभिः सु
ते सुनीथासो वसूयवः ॥ गोभिः क्राणा अनूषत गोभिः ऊर्वा
णा अस्तोषत ॥ १९ ॥ आनूर्षिं च हरिमीद्रो रूपस्थे वाशीभिः ° द्दर

स्तक्षताश्मन्मयीभिः ॥ आ सिंच हरिं द्रोरुपस्थे द्रुममयस्य हरिः
सोमो हरितवर्णो यमपीतरो हरिरे तस्मादेव ॥ वाशीभिस्तक्षता
श्मन्मयीभिः ॥ वाशीभिरश्ममयीभिरिति वा वाग्भिरिति वा ॥ स
शर्ईदर्यो विषुणस्य जंतोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥ स उत्सह
तां यो विषुणस्य जंतोर्विषमस्य मा शिश्नदेवा अब्रह्मचर्याः शि
श्नं श्नथयतेः ॥ अपि गुर्ऋतं नः ॥ सत्यं वा यज्ञं वा ॥ २० ॥ आ घा ता गच्छा
नुत्तरा युगानि यत्र जामयः कृणवन्नजामि ॥ उपबर्बृहि वृषभा

यंबाहुमन्यमिंछस्वसुभगेपतिंमत् ॥ आगमिष्यंतितान्युत्तरा
णियुगानियत्रजामयःकरिष्यंत्यजामिकर्माणिजाम्यतिरेक
नामबालिशस्यवासमानजातीयस्यवोपजनउपधेहिवृष
भायबाहुमन्यमिछस्वसुभगेपतिंमदितिव्याख्यातं ॥ २१ द्यौ
र्मेपिताजनितानाभिरत्रबंधुर्मेमातापृथिवीमहीयं ॥ उत्तानयो
श्चम्वो ३ योनिरंतरत्रापितादुहितुर्गर्भमाधात् ॥ द्यौर्मेपितापा
तावापालयितावाजनयितानाभिरत्रबंधुर्मेमातापृथिवीम ॥ ६३

हतीयंबंधुःसंबंधनान्नाभिःसंनहनान्नाभ्यासंनद्धागर्भा
जायंतइत्याहुरेतस्मादेवज्ञातीन्सनाभयइत्याचक्षतेसबं
धवइतिचज्ञातिःसंज्ञानात् ॥ उत्ताऽनयोश्चम्वो ३ योनिरं
तः ॥ उत्तानउत्ततानऊर्ध्वतानोवातत्रपितादुहितुर्गर्भंद
धातिपर्जन्यःपृथिव्याः ॥ अथानःशंयोररपोदधात ॥ रपो
रिप्रमितिपापनामनीभवतःशमनंचरोगाणांयावनंच
भयानामथापिशंयुर्बार्हस्पत्यउच्यते ॥ तच्छंयोरावृणी

महे गातुं यज्ञाय गातुं यज्ञपतय इत्यपि निगमो भवति ॥ गम
नं यज्ञाय गमनं यज्ञपतये ॥ २२ ॥ तृतीयः पादः ॥ अदितिर
दीना देवमाता ॥ २३ ॥ अदितिर्द्यौरदितिरंतरिक्षमदिति
र्माता स पिता स पुत्रः ॥ विश्वे देवा अदितिः पंच जना अदि
तिर्जातमदितिर्जनित्वं ॥ इत्यदितेर्विभूतिमाचष्ट एना
० न्यदीनानीति वा ॥ यमेरिरे भगवः ॥ एरिर इतीर्तिरुपसृष्टो
ऽभ्यस्तः ॥ २४ ॥ उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशंति ६४

क्षितयो भरेषु ॥ नीचायमानं जसुरिं न श्येनं श्रवश्चाछा पशु
मच्च यूथं ॥ अपि स्मैनं वस्त्रमथिमिव वस्त्रमाथिनं वस्त्रं वस्ते
स्ता ० स्तायुरिति स्तेननाम संस्त्यानमस्मिन् पापकमिति नैरुक्ता
स्तस्पतेर्वा स्यादनु क्रोशंति क्षितयः संग्रामेषु भर इति संग्रा
मनाम भरतेर्वा हरतेर्वा नीचायमानं नीचैरयमानं नीचैर्नि
चितं भवत्युच्चैरुच्चितं भवति जस्तमिव श्येनं श्येनः शंसनी
यं गछति ॥ श्रवश्चाछा पशुमच्च यूथं ॥ श्रवश्चापि पशुमच्च यू

थं प्रशंसो च यूथं च धनं च यूथं चेति वा यूथं यौतेः समायुतं भ
वति ॥ इंधान एनं जरते स्वाधीः ॥ गृणाति ॥ मंदी मंदतेस्तुति
कर्मणः ॥ प्र मंदिने पितुमदर्चता वचः ॥ प्रार्चत मंदिने पितुम
द्वचो गौ व्याख्यातः ॥ २५ ॥ अत्राह गोरमन्वत नाम त्वष्टुरपी
च्यं ॥ इत्था चंद्रमसो गृहे ॥ अत्र ह गोः सममंसतादित्यरश्मयः
स्वन्नामापीच्यमपचितमपगतमपिहितमंतर्हितं वामु
त्र चंद्रमसो गृहे गातुर्व्याख्यातो दंसयः कर्माणि दंसयंत्ये ॥ ६५

पीय ४

नानि ॥ कुत्साय मन्मन्नह्यश्च दंसय इत्यपि निगमो भवति ॥ स
हूता वनैनेनमश्नोत्यंहतिः ॥ सहूता वनैनेनमंहतिरश्नोत्यंहतिश्चां
हश्चांहुश्च हंतेर्निरूढोपधाद्विपरीतात् ॥ बृहस्पते चयस इत्पि
यारुं ॥ बृहस्पते यच्चातयसि देवपीयुं तिर्हिंसाकर्मा वियुते द्यावा
पृथिव्यौ वियमनात् ॥ समान्या वियुते दूरे अंते ॥ समानं संमा
नमात्रं भवति मात्रा मानाद्दूरं व्याख्यातमंतोततेः सधगिति पृथ
ग्भावस्य प्रवचनं भवत्यथापृथ्वोत्यर्थे दृश्यते ॥ सधगया सध

गुतारंमिमिक्षुः ॥ सध्रुवंनयासीर्सं ध्रुवंन्नशमिश्राइतिचास्याइतिचा
स्याइतिचोदात्तंप्रथमादेशेनुदात्तमन्वादेशेतीव्रार्थतरमुदात्त
मल्पीयोर्थतरमनुदात्तं ॥ २६ ॥ अस्या ऊषुण उपसातयेभु(
वोहेलमानोररिवाँअजाश्व ॥ अश्वेनःसातयउपनवाहेलमा
नोक्रुध्यंन्नररिवान्नातिरन्यस्तोजाश्वेतिपूषणमाहाजाश्वाजा
अजनाअथानुदात्तं ॥ दीर्घायुरस्यायःपतिर्जीवातिशरदः(

॥ ६६

स तु
शतं ॥ दीर्घायुरस्यायःपतिर्जीवतुशरदःशतंशरच्छृतास्र
स्यामोषधयोभवंतिशीर्णाआपइतिवा अस्या अस्येत्येतेने(
व्याख्यातं ॥ २७ ॥ अस्यवामस्यपलितस्यहोतुस्तस्यभ्रातामध्य
ध्यमोअस्त्यश्नः ॥ तृतीयोभ्राताघृतपृष्ठोअस्यात्रापश्यंविश्प
तिंसप्तपुत्रं ॥ अस्यवामस्यवननीयस्यपलितस्यपालयितु
र्होतुर्ह्वातव्यस्यतस्यभ्रातामध्यमोअस्त्यश्नोभ्राताभरते

अस्या ७२

हरतिकर्मणोहरतेर्भागंभर्त्तंभवतीतिवातृतीयोभ्राता
घृतपृष्ठोऽयमग्निस्तत्रापश्यंसर्वस्यपातारंवापालयितारं
वाविश्पतिंसप्तपुत्रंसप्तमपुत्रंसर्पणपुत्रमितिवासप्तसृ
प्तासंख्यासप्तादित्यरश्मयइतिवदंति ॥ २८ ॥ सप्तयुंजे
तिरथमेकचक्रमेकोअश्वोवहतिसप्तनामा ॥ त्रिनाभिच
क्रमजरमनर्वंयत्रेमाविश्वाभुवनाधितस्थुः ॥ सप्तयुंजं

तिरथमेकचक्रमेकचारिणंचक्रंचकतेर्वाचरतेर्वाक्रामते
र्वैकोऽश्वोवहतिसप्तनामादित्यःसप्तास्मैरश्मयोरसानभि
सन्नामयंतिसप्तैनमृषयस्तुवंतीतिवेदमपीतरन्नामैत
स्मादेवाभिसन्नामात्संवत्सरप्रधानउत्तरोर्द्धर्चस्त्रिनाभिच
क्रंत्र्यृतुःसंवत्सरोग्रीष्मोवर्षाहेमंतइतिसंवत्सरःसंवसंते
स्मिन्भूतानिग्रीष्मोग्रस्यंतेस्मिन्रसावर्षावर्षत्यासुपर्जन्योहेमं

तोहिमवान्हिमंपुनर्हंतिवाहिनोतेर्वाजरमजरणधर्माणम
नर्वमप्रत्यृतमन्यस्मिन्यत्रेमानिसर्वाणिभूतान्यभिसंतिष्ठं
तेतंवत्सरंसर्वमात्राभिस्तौतिपंचारेचक्रेपरिवर्त्तमानइति
पंचर्त्तुतायाःपंचर्त्तवःसंवत्सरस्येति चब्राह्मणंहेमंतशि
शिरसमासेनषळरआहुरर्पितमितिषळृतुतायाअराःप्र
त्यृतानाभौषट्पुनःसहर्तः॥ द्वादशारन्नहितज्जराय॥ द्वा

॥६९

दशप्रधयश्चक्रमेकमिति मासानांमासामानात्प्रधिःप्रहितोभ
वति॥ तस्मिन्साकंत्रिशतानशंकवोर्पिताःषष्टिर्नचलाचलासः॥
षष्टिश्चहवैत्रीणिचशतानिसंवत्सरस्याहोत्राइतिचब्राह्मणं
समासेनंसप्तशतानिविंशतिश्चतस्थुः॥ सप्तचवैशतानिविं
शतिश्चसंवत्सरस्याहोरात्राइतिचब्राह्मणंविभागेन ॥२७॥ विभागेन
॥ चतुर्थोध्यायः समाप्तः॥ ॥ सस्निमविंदच्चरणेनदीनां॥ सं
स्नातंमेघं॥ वाहिष्ठोवांहवानांस्तोमोदूतोहुवन्नरा॥ वोळ्ह

तमोज्ञानानांस्तोमोदूतोहुवंन्नरोनरामनुष्यानृत्यंतिकर्मसु
दूतो जवतेर्वाद्रवतेर्वावारयतेर्वावशानोवष्टे
र्वावाश्यतेर्वा॥ सप्तस्वसृररुषीर्वावशानइत्यपिनिगमोभ
वति॥ वार्यंवृणोतेरथापिवरतमं॥ तद्वार्यंवृणीमहेवरि
ष्ठंगोपयत्यं॥ तद्वार्यंवृणीमहेवर्षिष्ठंगोपायितव्यंगोपिता
रोयूयंस्थयुष्मभ्यमितिवांधइत्यंनन्नामाध्यानीयंभवति॥
आमत्रेभिःसिंचतामद्यमंधः॥ आसिंचतामत्रैर्मेद्यमंधो ६९

मत्रंपात्रममाअस्मिन्नदंत्यमापुनरनिर्मितंभवतिपात्रंपाना
न्नमोप्यंधउच्यतेनास्मिन्ध्यानंभवतिनदर्शनमंधंतमइत्य
भिनाषंतेयमपीतरोंधएतस्मादेव॥ पश्यदक्षण्वान्नविचेत
दंधइत्यपिनिगमोभवति॥१॥ असश्चंतीभूरिधारेपयस्व
ती॥ असज्यमानेइतिवाव्युदस्यंत्यावितिवाबहुधारेउद
कवत्यौवनुष्यातिर्हंतिकर्मानवगतसंस्कारोभवति॥ वनु

यामवनुष्यत इत्यपि निगमो भवति ॥ दीर्घप्रयज्युमति यो व
नुष्यति वयं जयेम पृतनासु दूढ्यः ॥ दीर्घप्रततयज्ञमभिजि
घांसति यो वयं तं जयेम पृतनासु दूढ्यं दुर्धियं पापधियं पा
पः पाताऽपेयानां पापत्यमानो वाङेव पततीति वा पापत्यतेर्वा
स्यात्तरुष्यतिरप्येवंकर्मा ॥ इंद्रेण युजा तरुषेम वृत्रमित्यपि
निगमो भवति ॥ भंदना भंदते स्तुतिकर्मणः ॥ पुरुप्रियो भं

दते धामभिः कविरित्यपि निगमो भवति ॥ स भंदना उदिय
र्त्ति प्रजावतीरिति च ॥ अन्येन मदाहनो याहि तूयं ॥ अन्येन
मदाहनो गछ क्षिप्रमाहंसीव भाषमाणेत्यसभ्यभाषणादा
हना इव भवत्येतस्मादाहनः स्यादृषिर्नदो भवति नदते
स्तुतिकर्मणः ॥ नदस्य मारुधतः काम आगन् ॥ नदनस्य
मारुधतः काममागमत्संरुद्धप्रजननस्य ब्रह्मचा

रिणाइत्यृषिपुत्राविलपितंवेदयंते ॥ २ ॥ नयस्यद्यावापृथिवीन
धन्वनांतरिक्षंनाद्रयः सोमोअक्षाः ॥ अश्नोतेरित्येके ॥ अनूपे
गोमान्गोभिरक्षाः सोमोदुग्धाभिरक्षाः ॥ लोपाशः सिंहंप्रत्यं
चमक्षाः ॥ क्षियतिनिगमः पूर्वः क्षरतिनिगमउत्तरइत्येकेनू
पेगोमान्गोभिर्यदाक्षियत्यथसोमोदुग्धाभ्यः क्षरतिसर्वेक्षियति
निगमाइतिशाकपूणिः श्वात्रमितिक्षिप्रनामाशुअतनंभवति ॥ सप
तत्रीत्वरंस्थाजगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः ॥ सपतत्रिचे

त्वरंस्थावरंजंगमंचयत्तत्क्षिप्रमग्निरकरोज्जातवेदा ऊतिरवना
त् ॥ आत्वारथंयथोतयइत्यपिनिगमोभवति ॥ हासमानेइत्युपरिष्टा
द्व्याख्यास्यामः ॥ ३ ॥ वम्रकः पड्भिरुपसर्पदिंद्रं ॥ पानैरितिवास्पाश
नैरितिवा ॥ ससंनपक्वमविदच्छुचंतं ॥ स्वप्नमेतन्मध्यमंज्योतिर
नित्यदर्शनंतदिवाविदज्ज्वल्यमानं ॥ द्विताचसत्तास्वधयाच
शंभुः ॥ द्वैधंसत्तामध्यमेचस्थानउत्तमेच ॥ शंभुःसुखभूः ॥ मृगं
नव्रामृगयंते ॥ मृगमिवव्रात्याः प्रेषावराहोमेघोभवति वराह

रोवरमाहारमाहार्षीरितिचब्राह्मणंविध्यद्वराहंतिरोअद्रिमस्ते
त्यपिनिगमोभवत्ययमपीतरोवराहएतस्मादेवबृहतिमूलानि
वरंवरंमूलंबृहतीतिवा॥वराहमिंद्रएमुषमित्यपिनिगमोभव-
त्यंगिरसोपिवराहाउच्यंते॥ब्रह्मणस्पतिर्वृषभिर्वराहैः॥अथा
प्येतेमाध्यमकादेवगणावराहवउच्यंते॥पश्यन्हिरण्यचक्रान
योदंष्ट्रान्विधावतोवराहून्॥४॥स्वसराण्यहानिभवंतिस्वयंसा
रीण्यपिवास्वरादित्योभवतिसएनानिसारयति॥उस्राइवस्व

॥७२

सराणीत्यपिनिगमोभवति॥शर्याअंगुलयोभवंतिसृजंतिकर्मा
णिशर्याइषवःशरमय्यःशरःशृणातेः॥शर्याभिर्नभरमाणोग
भस्त्योरित्यपिनिगमोभवत्यर्कोदेवोभवतियदेनमर्चंत्यर्कोमंत्रो
भवतियदेनेनार्चंत्यर्कमंनंभवत्यर्चतिभूतान्यर्कोवृक्षोभवति
सवृतःकटुकिम्ना॥५॥गायंतित्वागायत्रिणोर्चंत्यर्कमर्किणः॥
ब्रह्माणस्त्वाशतक्रतउद्वंशमिवयेमिरे॥गायंतित्वागायत्रिणः
प्रार्चंतितेर्कमर्किणब्रह्माणस्त्वाशतक्रतउद्येमिरेवंशमिववं

शोवनशायोभवतिवननाछ्रूयतइतिवापवीरथनेमिर्भवतियद्विपुनातिभूमिं॥ उतपव्यारथानामद्रिंभिंदंत्योजसा॥ तंमरुतःक्षुरपविनाव्ययुरित्यपिनिगमौभवतः॥ वक्षोव्याख्यातंधन्वांतरिक्षंधन्वंत्यस्मादापः॥ तिरोधन्वातिरोचतइत्यपिनिगमोभवति॥ सिनमंनंभवतिसिनातिभूतानि॥ येनस्मासिनंभरथःसखिभ्यइत्यपिनिगमोभवतीत्थामुथेत्येतेनव्याख्यातंसचासहेत्यर्थः॥ वसुभिःसचाभुवा॥ वसुभिःसहभुवौ॥ चिदितिनिपातोनुदात्तःपु

रस्तादेवव्याख्यातोथापिपशुनामेहभवत्युदात्तश्चिदसिमनासिचितास्त्वयिभोगाश्चेतयसइतिवाआइत्याकारउपसर्गःपुरस्तादेवव्याख्यातोथाप्यध्यर्थेदृश्यते॥ अभ्रआँअपः॥ अभ्रआअपोभ्रेअपइतिद्युम्नंद्योततेर्यशोवान्नंवा॥ अस्मेद्युम्नमधिरत्नंचधेहि॥ अस्मासुद्युम्नंचरत्नंचधेहि॥ प्रथमःपादः॥ पवित्रंपुनातेर्मंत्रःपवित्रमुच्यते॥ येनदेवाःपवित्रेणात्मानंपुनतेसदेत्यपिनिगमोभवति॥ रश्मयःपवित्रमुच्यंतेगभस्तिपूतइत्यपिनि

गमो भवत्यापः पवित्रमुच्यंते ॥ शतपवित्राः स्वधया मदंतीर्बहूदकाः ॥
अग्निः पवित्रमुच्यते वायुः पवित्रमुच्यते सोमः पवित्रमुच्यते सूर्यः प
वित्रमुच्यत इंद्रः पवित्रमुच्यते ॥ अग्निः पवित्रं स मा पुनातु वायुः सोमः
सूर्य इंद्रः पवित्रं ते मा पुनंत्वित्यपि निगमो भवति ॥ तोदस्तुद्यतेः ७ पु
रुर्वो दाश्वान्वोचेरिरग्ने तव स्विदा ॥ तोदस्येव शरण आ महस्य ॥
बहुदाश्वांस्त्वामेवाभिह्वयाम्यरिरमित्रऋच्छतेरीश्वरोप्यरिरेत
स्मादेव यदन्यदेवत्या अग्नावाहुतयो हूयंत इत्येतद्दृष्ट्वैवमवक्ष्य

॥ ७४

त ॥ तोदस्येव शरण आ महस्य ॥ तुदस्येव शरणेधि महतः स्वंचाः सु
अंचनः ॥ आजुह्वानो घृतपृष्ठः स्वंचा इत्यपि निगमो भवति ॥ शिपिवि
ष्टो विष्णुरिति विष्णोर्द्वे नामनी भवतः कुत्सितार्थीयं पूर्वं भवतीत्याप
मन्यवः ८ किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिष्टो अस्मि ॥
मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥ किं ते विष्णो
प्रख्यातमेतद्भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेप इव निर्वेष्टितो
स्मीत्यप्रतिपन्नरश्मिरपि वा प्रशंसानामैवाभिप्रेतं स्यात् किं ते विष्णो

वि ४

प्रख्यातमेतद्भवतिप्रख्यापनीयंयदुतप्रब्रूषेशिपिविष्टोस्मीतिप्रति
पन्नरश्मिःशिपयोत्ररश्मयउच्यंतेतिराविष्टोभवति ॥ मावर्पोअ
स्मदपगूहएतत् ॥ वर्पइतिरूपनामवृणोतीतिसतोयदन्यरूपः
समिथेसंग्रामेभवसिसंयतरश्मिस्तस्योत्तराभूयसेनिर्वचनाय
॥ ६ प्रतत्तेअद्यशिपिविष्टनामार्यःशंसामिवयुनानिविद्वान् ॥ तं
त्वागृणामितवसमतव्यान्क्षयंतमस्यरजसःपराके ॥ तत्तेअद्य
शिपिविष्टनामार्यःप्रशंसाम्यर्योहमस्मीश्वरःस्तोमानामर्यस्त्वमसी

तिवातंत्वास्तौमितवसमतव्यांस्तवसइतिमहतोनामधेयमुदितोभ
वतिनिवसंतमस्यरजसःपराकेपराक्रांतआघृणिरागतहृणिः ॥
आघृणेसंसचावहे ॥ आगतहृणेसंसेवावहेपृथुज्रयाःपृथुजवः
॥ पृथुज्रयोअश्विनादायुर्दस्योः ॥ प्रामाप्यदावुद्दीस्योः ॥ १० ॥ अग्निं
नरोदीधितिभिररण्योर्हस्तच्युतीजनयंतप्रशस्तं ॥ दूरेदृशंगृह
पतिमथर्युं ॥ दीधितयोंगुलयोभवंतिधीयंतेकर्मस्वरणीप्रत्यृत
एनेअग्निःसमरणाज्जायतइतिवाहस्तच्युतीहस्तप्रच्युत्याजनयं

तप्रशास्तंदूरेदर्शनंगृहपतिमतनवंतं ११ एकयाप्रतिधापिबत्साकंस
रांसित्रिंशतं इंद्रः सोमस्य काणुका ॥ एकेनप्रतिधानेनापिबत्साकं
सहेत्यर्थः ॥ इंद्रः सोमस्यकाणुका ॥ कांतकानीतिवाक्रांतकानीति
वाकृतकानीतिवेंद्रः सोमस्यकांतइतिवाकणेघातइतिवाकणेह
तः कांतिहतस्तत्रतथाज्ञिकावदयंतेत्रिंशदुक्थपात्राणिमाध्यंदि
नेसवनएकदेवतानितान्येतस्मिन्कालएकेनप्रतिधानेनपिबंतितां
न्यत्रसरांस्युच्यंतेत्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति
नैरुक्तास्तद्याएताश्चांद्रमस्यआगामिन्यआपोभवंतिरश्मयस्ताअ

परपक्षेपिबंतितथापिनिगमोभवति ॥ यमःक्षितिमःक्षितयःपिबंती ०
ति ॥ तंपूर्वपक्षआप्याययंतितथापिनिगमोभवति ॥ यथादेवाअंशुमा
त्रि ० प्याययंति ॥ १२ ॥ अध्रिगुर्मंत्रोभवतिगव्यधिकृतत्वादपिवाप्रशंसाना
मेवाभिप्रेतंस्यात्तच्छब्दवत्वादध्रिगोशमीध्वं सुशमिशमीध्वंशमीध्व
मध्रिगवित्यग्निरप्यध्रिगुरुच्यते ॥ उम्नेश्चोतंत्यध्रिगोशचीवः ॥ अध्रि
तगमनकर्मवंनिंद्रोप्यध्रिगुरुच्यते ॥ अध्रिगवउहमिंद्रायेत्यपिनिग
ति। मोभवत्यांगूषःस्तोमआघोषः ॥ एनांगूषेणवयमिंद्रवंतः ॥ अनेनस्तो
मेनवयमिंद्रवंतः १२ आपांतमन्युस्तृपलप्रभर्माधुनिःशिमीवांछरु

मौँऋजीषी॥सोमोविश्वान्यतसावनानिनार्वागिंद्रंप्रतिमानानिदेभुः॥
अपातितमन्कस्तृप्रप्रहरीसोमोवेंद्रोवाधुनिर्दूनोतेःशिमीतिकर्मना
मशामयातर्वाशक्नोतेर्वऋजीषीसोमोयत्सोमस्यपूयमानस्यातिरिच्यते
तदृजीषमपार्जितंभवतितेनर्जीषीसोमोथाप्यैंद्रोनिगमोभवति॥
ऋजीषीवज्रीति॥हर्योरस्यसभागोधानाश्चेतिधानाभ्राष्ट्रेहिताभवंति
फलेहिताभवंतीतिवा॥बब्धांतेहरीधानाउपऋजीषंजिघ्रतामित्यपि
ति निगमोभवत्यादिनाभ्यासेनोपहितेनोपधामादत्तेबभस्तिरत्तिकर्मासो
मःसर्वाण्येतसानिवनानिनार्वागिंद्रंप्रतिमानानिदभ्नुवंतियैरेनंप्रति

॥७७॥

म्रदंजी

मिमतेनैनंतानिदभ्नुवंत्यर्वाउ॰विनमप्राप्यविनश्यंतीतींद्रप्रधानेत्ये
केनैघंटुकंसोमकर्मोभयप्रधानेत्यपरंश्मशाशुअश्नुतइतिवाश्माश्नु
तइतिवा॥अवश्मशारुधद्वाः॥अवारुधच्छ्मशावारिति॥१४द्विती श्मपा॰
यःपादः॥ ॥उर्वश्यप्सराउर्वभ्यश्नुतऊरुभ्यामश्नुतउरुर्वावशोस्या
अप्सराअप्सारिण्यपिवाप्सइतिरूपनामाप्सातेरप्सानीयंभवत्यादर्श
नीयंव्यापनीयंवास्पष्टंदर्शनायेतिशाकपूणिर्यदप्सइत्यभक्षस्याप्सो
नामेतिव्यापिनस्तद्राभवतिरूपवतीतदनयात्तमितिवात[illegible]सैद
त्तमितिवातस्यादर्शनान्मित्रावरुण

योरेतश्चस्कंदत्तदभिवादिन्येषर्ग्भवति ॥१५॥ उतासि मैत्रावरुणो व
सिष्ठोर्वश्या ब्रह्मन्मनसोधि जातः ॥ द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे
देवाः पुष्करे त्वाददंत ॥ अप्यसि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मन
सोधि जातो द्रप्सं स्कन्नं ब्रह्मणा दैव्येन द्रप्सः संभृतप्सानीयो भवति स
र्वे देवाः पुष्करे त्वाधारयंत पुष्करमंतरिक्षं पोषति भूतान्युदकं पुष्करं
पूजाकरं पूजयितव्यमिदमपीतरत्पुष्करमेतस्मादेव पुष्करं वपुष्क
रं वा पुष्पं पुष्पतेर्वयुनं वेतेः कांतिर्वा प्रज्ञा वा ॥१६॥ सइत्तमो वयु
पं

नं ततन्वत्सूर्येण वयुनवच्चकार ॥ स तमो प्रज्ञानं ततन्वत्स तं सूर्येण प्रज्ञा
नवच्चकार वाजपस्त्यं वाजपतनं ॥ सनेम वाजपस्त्यमित्यपि निगमो
भवति ॥ वाजगंध्यं गध्यत्युत्तरपदं ॥ अश्याम वाजगंध्यमित्यपि नि
गमो भवति गध्यं ग्रह्णातेः ॥ सज्रा वाजं न गध्यं युयूषन्नित्यपि निगमो
भवति ॥ गध्यतिर्मिश्रीभावकर्मा ॥ आगधिता परिगधितेत्यपि निग
मो भवति ॥ कौरयाणः कृतयानः ॥ पाकस्थामा कौरयाण इत्यपि निग
मो भवति ॥ तौरयाणस्तूर्णयानः ॥ स तौरयाण उप याहि यज्ञं मरुद्भि
रिंद्र सखिभिः सजोषा इत्यपि निगमो भवत्यह्रयाणो ह्रीतयानः ॥ अनु

ष्टुयाल्लणुहयद्रुयाणीत्यपिनिगमो भवति ॥ हरयाण हरमाणयानः ॥ रज
तं हरयाण इत्यपि निगमो भवति ॥ यआरितः कर्मणि कर्मणि स्थिरः
प्रत्यृतः स्तोमान् व्रंदी व्रंदतेर्मृदूभावकर्मणः ॥१७॥ नियद्वृणक्षि श्वसन
स्य मूर्द्धनि शुष्णस्य चिद्व्रंदिनो रोरुवद्वना ॥ निवृणक्षि यच्छ्वसनस्य
मूर्द्धनि शब्दकारिणः शुष्णस्यादित्यस्य शोषयितू रोरूयमाणो व
नानीति वा वधेनेति वा ॥ अव्रदंतवीलितेत्यपि निगमो भवति ॥ वील
यतिश्च व्रीलयतिश्च संस्तंभकर्माणौ पूर्वेण संप्रयुज्येते निष्षपी स्त्रीका
मो भवति विनिर्गतपसां स्पशः स्पशतेः स्पृशतिकर्मणः ॥ मा नो मघेव

॥७५॥

निष्षपी परा दाः ॥ स यथा धनानि विनाशयति मा नस्त्वं तथा परा दाः ॥ तूर्णाश
मुदकं भवति तूर्णमश्नुते ॥ तूर्णाशं न गिरेरधीत्यपि निगमो भवति ॥ क्षुंपम
हिच्छत्रकं भवति यत्क्षुम्पते ॥१८॥ कदा मर्त्तमराधसं पदा क्षुंपमिव स्फुर
त् ॥ कदा नः शुश्रवद्गिर इंद्रो अंग ॥ कदा मर्त्तमनाराधयंतं पादेन क्षुंप
मिवावस्फुरसि कदा नः शृणोति च गिर इंद्रो अंगांगेति क्षिप्रनामांकि
तमेवांचितं भवति निचुंपुणः सोमो निचांतपणो निचमनेन प्रीणा
ति ॥१९॥ पत्नीवंतः सुता इम उशंतो यंति वीतये ॥ अपां जग्मिर्निचुंपु
णः ॥ पत्नीवंतः सुता इमेद्भिः सोमाः कामयमाना यंति वीतये पाना या

नि पा०

ति

पांजंतानि चुंपुणः समुद्रोपि निचुंपुण उच्यते निचमनेन पूर्यतेवभृथो
पि निचुंपुण उच्यते नीचैरस्मिन्क्वणंति नीचैर्दधती वा॥ अवभृथ निचुं
पुणेत्यपि निगमो भवति॥ निचुंपुण निचुंकुणेति च पदिर्गंउर्भवति
यत्पद्यते ॥२०॥ सुगुरसत्सुहिरण्यः स्वश्वा बृहदस्मै वयइंद्रोद
धाति॥ यस्त्वायंतं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति॥ सु
गुर्भवति सुहिरण्यः स्वश्वो महद्वास्मै वयइंद्रो दधाति यस्त्वायंत
मंनेन प्रातरागामिंनतिथेर्मुक्षी जयेव पदिमुत्सिनाति कुमारो मु

॥८०

क्षीजामोचनाद्वशायनाद्वततनाद्व पादुःपद्यातः॥ आवि स्वःकृणुतेगू
हते बुसं स पादुरस्य निर्णिजो न मुच्यते॥ आविष्कुरुते भासमादित्यो
गूहते बुसं बुसमित्युदकनाम ब्रवीतेः शब्दकर्मणो भ्रंशतेर्वा यद्व
र्षंपातय [illegible] त्युदकंर [illegible] श्मिभिस्तत्प्रत्यादत्ते ॥२१॥ तृतीयः पादः॥
वृकश्चंद्रमा भवति विवृतज्योतिष्को वा विकृतज्योतिष्को वा विक्रांत
ज्योतिष्को वा ॥२२॥ अरुणो मासकृद्वृकःपथायंतं ददर्श हि॥ उज्जिही
ते निचाय्यातष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी॥ अरुण आरोच

नोमासकृन्मासानांचार्द्धमासानांचकर्त्ताचंद्रमावृकःपथायंतंददर्श
नक्षत्रगणमभिजिहीतेनिचाय्ययेनयेनयोक्ष्यमाणोभवतिचंद्रमा
स्तंतमेवंनिवपृष्ठरोगीजानीतमेस्यद्यावापृथिव्यावित्यादित्योपि
वृकउच्यतेयदावृंक्ते ॥२३॥ अजोहवीदश्विनावर्त्तिकावामास्नो
यत्सीममुंचतंवृकस्य ॥ अह्वयदुषाअश्विनावादित्येनाभिग्रस्ता
तामश्विनौप्रमुमुंचतुरित्याख्यानंश्वापिवृकउच्यतेविकर्त्तनात् ॥
वृकश्चिदस्यवारणउरामथिः ॥ उरणमाथिः ॥ उरणऊर्णावान्भव(
त्यूर्णापुनर्वृणोतेरूर्णोतेर्वा ॥ वृद्धवाशिन्यपिवृकउच्यतेशातंमेषा(

न्वृकेचक्षदानमृज्राश्वंतंपितांधंचकारेत्यपिनिगमोभवति ॥ जोषइ
त्यविज्ञातनामधेयंजोषयितव्यंभवति ॥२४॥ यइंद्राग्नीसुतेषुवांस्तव
तेष्वृतावृधा ॥ जोषवाकंवदतःपज्रहोषिणानदेवाभसथश्चन ॥ यइंद्रा
ग्नीसुतेषुवांसोमेषुस्तौतितस्याश्नीथोथयोयंजोषवाकंवदतिविजंज
पःप्रार्जिताहाषिणेनदेवौतस्याश्नीथःकृत्तिःकृंततेर्यशोवाअन्नंवा ॥ म
हीवकृत्तिःशरणातइंद्र ॥ सुमहत्तइंद्रशरणमंतरिक्षंकृत्तिरिवेतीयम
पीतराकृत्तिरेतस्मादेवकृत्तमप्युपमार्थेवा ॥ कृत्तिवासाःपिनाकहस्तो

वततधन्वेत्यपिनिगमो भवति॥ श्वघ्नी कितवो भवति स्वं हंति स्वं पुनरा
श्रितं भवति॥ कृतं न श्वघ्नी विचिनोति देवने॥ कृतमिव श्वघ्नी विचिनो
ति देवने कितवः किं तवास्तीति शब्दानुकृतिः कृतवान्वाशीर्नामकः नी पा०
सममितिपरिग्रहार्थीयं सर्वनामानुदात्तं २५ मा नः समस्य दूढ्य१ः
परिद्वेषसोऽंहतिः॥ ऊर्मिर्न नावमा वधीत्॥ मा नः सर्वस्य दुर्धि
यः पापधियः सर्वतो द्वेषसोऽंहतिरूर्मिरिव नावमावधीः ऊर्मिरू व ५
र्णोतेर्नौः प्रणोत्तव्या भवति नमतेर्वा तत्कथमनुदात्तप्रकृति नाम
स्याद्दृष्टव्ययं तु भवति॥ उतो समस्मिन्ना शिशीहि नो वसो इति सप्त

म्यां शिशीतिर्दानकर्मा॥ उरुष्या णो अघायतः समस्मादिति पंचम्या
मुरुष्यती रक्षाकर्मकः॥ अथापि प्रथमाबहुवचने॥ नभंतामन्यके समे
२६ हविषा जारो अपां पिपर्ति पपुरिर्नरा॥ पिता कुटस्य चर्षणिः॥ हवि
षापां जरयिता पिपर्ति पपुरिरिति पृणाति निगमो वा प्रीणाति निगमो
वा पिता कृतस्य कर्मणश्चर्षणिरादित्यः शंब इति वज्रनाम शमयतेर्वा
शातयतेर्वा॥ उग्रो यः शंबः पुरुहूत तेनेत्यपि निगमो भवति॥ के
पयः कपूया भवंति कपूयमिति पुनाति कर्म कुत्सितं दुष्पूयं भवति
२७॥ पृथक्प्रायन्प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा॥ न

येशेकुर्यज्ञियांनावमारुहमीर्मैवतेन्यविशंतकेपयः॥ पृथक्प्रायन्पृ
थक्प्रथतेः प्रथमादेवहूतयोऽयादवानाह्वयंताकुर्वतश्रवणीया
नियशांसिदुरनुकराण्यन्यैर्येशक्नुवन्यज्ञियान्नावमारोढुम
थायनाशक्नुवन्यज्ञियांनावमारोढुमीर्मैवातन्यविशंतेहै
वतेन्यविशंतऋणेनिवातन्यविशंतास्मिन्नेवलोकइति
वेर्मइतिबाहुनामसमीरिततरोभवति॥ एताविश्वास
वनास्तुमाकृषेस्वयंसूनासहसोयानिदधिषे॥ एतानिसर्वाणिस्था

नानितूर्णमुपाकुरुषेस्वयंबलस्यपुत्रयानिधत्स्वांसत्रमंहसत्राणिध
नुर्वाकवचंवाकवचंकुत्रंचितंभवतिकांचितंभवतिकायेंचितं
भवतीतिवा २८ प्रीणीताश्वान्हितंजयाथस्वस्तिवाहंरथमित्कृणु
ध्वं॥ द्रोणाहावमवतमश्मचक्रमंसत्राकोशंसिंचतानृपाणं॥ प्रीणीता
श्वान्सुहितंजयथजयनंवोहितंस्तुस्वस्तिवाहनंरथंकुरुध्वंद्रोणाहा
वंद्रोणंद्रुममयंभवत्याहावआह्वानादावहआवहनादवतोवा
तितोमाहान्भवत्यश्मचक्रमशनचक्रमसनचक्रमितिवांसत्रको

शमंसत्राणिवाकोशस्थानीयानिसंतुकोशःकुष्णातेर्विकुषितोभ
वत्ययमपीतरः।कोशएतस्मादेवसंचयआचितमात्रोमहान्भव
तिसिंचितंन्यपाणांनरपाणंरूपकर्मणासंग्राममुपमिमीतेकाकुदं
ताल्वित्याचक्षतेजिह्वाकाकुवासास्मिंधीयातजिह्वाकोकुवा
कोकूयमानाएनांनुदतीतिवाजिह्वाजोहुवातालुतरतेस्तीर्णत
ममंगंलततेर्वास्याल्लंबकर्मणोविपरीताद्यथातलंलततेत्यवि
पर्ययः॥२९॥सुदेवोअसिवरुणयस्यतेसप्तसिंधवः॥अनुक्षरं
तिकाकुदंसूर्म्यंसुषिरामिव॥सुदेवस्त्वंकल्याणदानोयस्यत

वदेवसप्तसिंधवःप्राणायानुक्षरंतिकाकुदंसूर्म्यंसुषिरामिवत्यपि
निगमोभवति॥३०॥प्रवावृजेसुप्रयाबर्हिरेषामाविश्पतीवबीरि
टइयात॥विशामक्तोरुषसःपूर्वहूतौवायुःपूषास्वस्तयेनियुत्वा
न्॥प्रवृज्यतेसुप्रायणंबर्हिरेषामेयातसर्वस्यपातारौवापालयि
तारौवाबीरिटमंतरिक्षंभियोवाभासोवाततिरपिवोपमार्थेस्यादास
र्वपतीइवराजानौबीरिटेगणेमनुष्याणांरात्र्याविवासेपूर्वस्यामभि
हूतौवायुश्चनियुत्वान्पूषाचस्वस्त्ययनायनियुत्वान्नियुतोस्याश्वानि

युतोनियमनाद्वानियोजनाद्वाछामेराप्नुमितिशाकपूणिः परींसीमिति
व्याख्यातमनमनामस्वाश्रसेत्यातन व्याख्यातंसृणिरंकुशोभव
तिसरणादंकुशोंचतेराकुचितोभवतीतिवा॥ नेदीयइत्सृण्यः पक्व
मेयादित्यपिनिगमोभवतीतिकतममंकुशादायात्पक्कामोषधमा
गच्छत्वित्यागच्छत्विति॥ ३१॥ चतुर्थः पादः॥ पंचमोध्यायः समाप्तः॥
त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि॥ त्वंवनेभ्यस्त्वमो
षधीभ्यस्त्वंनृणांनृपतेजायसेशुचिः॥ त्वमग्नेद्युभिरहोभिस्त्वमाशुशुक्षणि

राशुइतिचशुइतिचक्षिप्रनामनीभवतः क्षणिरुत्तरः क्षणोतेराशुशुचाक्षणोतीतिवा
सनोतीतिवाशुक्शोचतेः पंचम्यर्थेवाप्रथमातथाहिवाक्यसंयोगआ इत्याकारउपस
र्गः पुरस्ताच्चिकीर्षितजउत्तरआशुशु॥ शोचयिषुरितिशुचिः शोचतेर्ज्वलतिकर्मणो
यमपीतरः शुचिरेतस्मादेवनिंषिक्तमस्मात्पापकमितिनैरुक्ताः॥ १॥ इंद्राशाभ्य
स्परिसर्वाभ्योअभयंकरत्॥ आशादिशोभवंत्यासदनादाशाउपदिशोभवंत्यभ्यश
नात्काशिर्मुष्टिः प्रकाशनान्मुष्टिर्मोचनाद्वामोषणाद्वामोहनाद्वा॥ इमेचिदिंद्ररोदसीअ
पारेयत्संगृभ्णामघवन्काशिरित्ते॥ इमेचिदिंद्ररोदसीरोधसीद्यावापृथिव्यौविरो
धनाद्रोधः कूलंनिरुणद्धिस्रोतः कूलंरुजतेर्विपरीताल्लोष्टोविपर्ययेणापारेदूरपा

रा

रेयसंग्रभाय मघवन्काशिरित्ते महान्॥ अहस्तमिंद्र संपिणक्कुणारुं॥ अहस्तमिंद्र
कृत्वा संपिंढि परिक्वणनं मेघं॥ २ अलातृणो वल इंद्र व्रजो गोः पुरा हंतोर्भयमानो
व्यार। सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमंतीः॥ अलातृणो
लमातर्दनो मेघो वलो वृणोतेर्व्रजो व्रजत्यंतरिक्षे गोरेतस्या माध्यमिकाया वाचः॥
पुराहननाद्भयमानो व्यार॥ सुगान्पथो अकृणोन्निरजे गाः॥ सुगमनान्पथो अ
करोन्निरजनाय गवां॥ प्रावन्वाणीः पुरुहूतं धमंतीः॥ आपो वा वहनाद्वाचो वा व
दनाद्बहुभिराहूतमुदकं भवति धम[illegible]तिर्गतिकर्मा॥ ३॥ उद्वृह रक्षः
सहमूलमिंद्र वृश्चा मध्यं प्रत्यग्रं शृणीहि॥ आ कीवतः सललूकं चकर्थ ब्रह्म

द्विषे तपुषिं हेतिमस्य॥ उद्धर रक्षः सहमूलमिंद्र मूलं मोचनाद्वा मोषणाद्वा मो
हनाद्वा वृश्च मध्यं प्रतिशृणीह्यग्रमग्रमागतं भवत्या कियतो देशात्सललू
कं संलुब्धं भवति पापकमिति नैरुक्ताः सररूकं वा स्यात्सर्तेरभ्यस्तात्तपुषि
स्तपतेर्हेतिर्हंतेः॥ त्यं चिदित्था कत्पयं शयानं॥ सुखपयसं॥ सुखमस्य पयः॥
विस्रुह आपो भवंति विस्रवणात्॥ वया इव रुरुहुः सप्त विस्रुह इत्यपि निग
मो भवति॥ वीरुध ओषधयो भवंति विरोहणात्॥ वीरुधः पारयिष्णव इत्य
पि निगमो भवति॥ नक्षद्दाभमभ्यशनेन दभ्नोतीति॥ नक्षद्दाभं
ततुरिं पर्वतेष्ठामित्यपि निगमो भवति॥ अस्कृधोयुरकृध्वायुः कृध्वीति ह्र

स्वनाम निवृत्तं भवति॥ यो अस्कृधोयुरजरः स्वर्वान् इत्यपि निगमो भवति॥४॥
आजासः पूषणं रथे निशृंभास्ते जनश्रियं॥ देवं वहंतु बिभ्रतः॥ आवहंत्व
जाः पूषणं रथे निःश्रथा हारिणस्ते जनश्रियं जातश्रियं बृबदुक्थो महदु
क्थो वक्तव्यमस्मा उक्थमिति बृबदुक्थो वा॥ बृबदुक्थं हवामह इत्यपि निग
मो भवत्यृदूदरः सोमो मृदूदरो मृदूदरेष्विति वा॥ ऋदूदरेण सख्या सचे रु
येत्यपि निगमो भव[illegible]त्यृदूपे इत्युपरिष्टाद्व्याख्यास्यामः॥ पुरुकामः पुरु
कामः॥ पुरुकामो हि मर्त्य इत्यपि निगमो भवत्य[illegible]सिन्वती असंखा ०
दंत्यौ॥ असिन्वती बप्सती भूर्यत्त इत्यपि निगमो भवति॥ कपना कंपनाः कृ

मयो भवंति॥ माषथा वृक्षं कपनेव वेधस इत्यपि निगमो भवति॥ भार्जीकः
प्रसिद्धभाः॥ धूमकेतुः समिधा भार्जीक इत्यपि निगमो भवति॥ रुजाना न
द्यो भवंति रुजंति कूलानि॥ संरुजानाः पिपिष इंद्रशत्रुरित्यपि निगमो भव
ति॥ जूर्णिर्जवतेर्वा द्रवतेर्वा दूनोतेर्वा॥ क्षिप्रा जूर्णिर्न वक्षतीत्यपि निग
मो भवति॥ परिवृं समोमनो वा वयो गात्॥ पर्यागाद्वां घ्रं[illegible]महरवं नेना
नं ॥ ५ ॥ प्रथमः पादः॥ उपलप्रक्षिण्युपलेषु प्रक्षिणात्युपलप्रक्षेपिणी वा॥ ६॥
कारुरहं ततो भिषगुपलप्रक्षिणी नना॥ नानाधियो वसूयवोनु गा इव तस्थि
मेंद्रायेंदो परिस्रव॥ कारुरहमस्मि कर्त्ता स्तोमानां ततो भिषक्ता [illegible] तइति

संताननाम पितुर्वा पुत्रस्य वा उपलप्रक्षिणी सक्तुकारिका नना नमतेर्माता वा दुहि
ता वा नाना धियो नाना कर्माणो वसूयवो वसुकामा अन्वास्थिताः स्मो गाव इव लो
कमिंद्रायेंदो परिस्रवेत्यध्येषणा ॥ आसीन ऊर्ध्वामुपसि क्षिणाति ॥ उपस्थे प्रक
लविद्वणिग्भवति कलाश्च वेदः प्रकलाश्च ॥ दुर्मित्रासः प्रकलवि[illegible]न्मिमाना इत्य
पि निगमो भवति ॥ अभ्यर्द्धयज्वा अभ्यर्द्धयन्यजति ॥ सिषक्ति पूषा अभ्यर्द्धयज्वेत्यपि
निगमो भव[illegible]ती [illegible]क्षे ईशिषे ॥ ईक्षे हि वस्व उभयस्य राजन्नित्यपि [illegible]गमो
भवति ॥ क्षोणस्य ॥ दयणस्य ॥ महः क्षोणस्याश्विना कण्वायेत्यपि निगमो भव
ति ॥ ७ ॥ अस्मे ते बन्धुः ॥ वयमित्यर्थः ॥ अस्मे यातं नासत्या सजोषाः ॥ अस्मानित्य
र्थः ॥ अस्मे समानेभिर्वृषभ [illegible]पौंस्येभिः ॥ अस्माभिरित्यर्थः ॥ अस्मे प्र यन्धि मघ

वञ्चृजीषिन् ॥ अस्मभ्यमित्यर्थः ॥ अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥ अस्मदित्यर्थः ॥
ऊर्व इव पप्रथे कामो अस्मे ॥ अस्माकमित्यर्थः ॥ अस्मे धत्त वसवो वसूनि ॥ अस्मा
स्वित्यर्थः ॥ पाथोंऽतरिक्षं पथा व्याख्यातं ॥ श्येनो न दीयन्नन्वेति पाथ इत्यपि निग
मो भवत्युदकमपि पाथ उच्यते पानात् ॥ आचष्ट आसां पाथो नदीनामित्यपि निग
मो भवत्यन्नमपि पाथ उच्यते पानादेव ॥ देवानां पाथ उप वक्षि विद्वान् — निगमो
भवति ॥ सवीमनि प्रसवे ॥ देवस्य वयं सवितुः सवीमनीत्यपि निगमो भवति ॥
सप्रथाः सर्वतः पृथुः ॥ त्वमग्ने सप्रथा असीत्यपि निगमो भवति ॥ विदथानि वेद
नानि ॥ विदथानि प्रचोदयन्नित्यपि निगमो भवति ॥ ८ ॥ श्रायन्त इव सूर्यं विश्वे
दिन्द्रस्य भक्षत ॥ वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥ समाः स्त्रि

ताःसूर्यमुपतिष्ठंतइतिवोपमार्थेस्यात्सूर्यमिवेंद्रमुपतिष्ठं तइतिसर्वाणींद्रस्यध
नानिविद्मनस्यमानाःसयथाधनानिविजानतिजातानिचजनिष्यमाणानिचतंवयंभा
गमनुध्यायामोजसाबलेनोजओजतेर्वाउब्जतेर्वाशीराश्रयणाद्वाश्रपणाद्वाथाय
मितराशीराशास्तेः॥इंद्रायगावआशिरमित्यपिनिगमोभवति॥सामेसत्याशी
र्देवेष्वस्त्वितिच॥यदातेमर्तोअनुभोगमानलादिद्ग्रसिष्ठओषधीरजीगः॥यदा
तेमर्तोभोगमन्वापद्वसुयसितृतमओषधीरगारीर्जीगर्गिर्गिरतिकर्मावागृ
णातिकर्मावा॥मूराअमूरनवयंचिकित्वोमहित्वमग्नेत्वमंगवित्से॥मूढावयं
स्मोमूढस्त्वमसिनवयंविद्मोमहित्वमग्नेत्वंतुवेत्थ॥शशमानःशंसमानः॥यो
वांयज्ञैःशशमानोहदाशतीत्यपिनिगमोभवति॥देवोदेवाच्याकृपा॥देवो

तिकर्मा४
ग२पा०

॥८९

देवान्प्रत्यंच्याकृपाकृपाकृपतेर्वाकल्पतेर्वा॥१०॥अश्रवंहिभूरिदावत्तरा
वांविजामातुरुतवाघास्यालात्॥अथासोमस्यप्रयतीयुवभ्यामिंद्राग्नी
स्तोमंजनयामिनव्यं॥अश्रौषंहिबहुदायितरौवांविजामातुरसुसमाप्ताज्जा
मातुर्विजामातेतिशश्वद्दाक्षिणाजाःक्रीतापतिमाचक्षतेसुसमाप्तइववा
रोभिप्रेतोजामाताजाअपत्यंतन्निर्मातोतवाघास्यालादपिचस्यालात्स्यालआ
संनःसंयोगेनेतिनैदानाःस्याल्लाजानावपतीतिवालाजालाजतेःस्यंशूर्पंस्य
तेःशूर्पमशनपवनंशृणातेर्वाथसोमस्यप्रदानेनयुवाभ्यामिंद्राग्नीस्तोमंज
नयामिनवतरमोमासइत्युपरिष्टाद्व्याख्यामः॥११॥षष्ठाध्यायस्यद्वितीयःपादः॥
स्या

सोमानंस्वरणंकृणुहिब्रह्मणस्पते।कक्षीवंतंयऔशिजः॥ सोमानांसोता
रंप्रकाशनवंतंकुरुब्रह्मणस्पतेकक्षीवंतमिवयऔशिजःकक्षीवान्क
क्ष्यावानौशिजउशिजःपुत्रउशिग्वष्टेःकांतिकर्मणोपित्वयंमनुष्यकक्ष
एवाभिप्रेतःस्यात्तंसोमानांसोतारंमाप्रकाशनवंतंकुरुब्रह्मणस्पते॥१२॥
इंद्रासोमासमघशंसमभ्य१घंतपुर्ययस्तुचरुरग्निवाँइव।ब्रह्मद्विषेक्रव्या
देघोरचक्षसेद्वेषोधत्तमनवायंकिमीदिने॥इंद्रासोमावघस्यशंसितार
मघंहंतेर्निर्ह्रसितोपसर्गआहंतीतितपुस्तपतेश्चरुर्मृच्चयोभवंतिचरते
र्वासमुच्चरंत्यस्मादापोब्रह्मद्विषेकव्यमदनेघोरख्यानायक्रव्यंविकृत्ता ॥२

ज्जायतइतिनैरुक्ताःद्वेषोधत्तमव्यवेयमनवयवंयदन्येनव्यवेयुरद्वेषस्मइ
तिवाकिमीदिनेकिमिदानीमितिचरतेकिमिदंकिमिदमितिवापिशुनायचर
तेपिशुनःपिंशतेर्विपिंशतीति॥१३॥कृणुष्वपाजःप्रसितिंनपृथ्वीयाहिराजे
वामवाँइ[illegible]नेन॥तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः॥कृ
णुष्वपाजःपाजःपालनात्प्रसितिमिवपृथ्वीप्रसितिःप्रसहनात्तंतुर्वाजालंवा
याहिराजेवामात्यवानभ्यमनवाँस्ववान्वेराभृतागणेनगतभयेनहस्ति
नेतिवातृष्व्यानुप्रसित्याद्रूणानस्तृप्वीतिक्षिप्रनामतरतेर्वात्वरतेर्वा
सितासिविध्यरक्षसस्तपिष्ठैस्तप्ततमैस्तृप्ततमैःप्रपिष्ठतमैरितिवा॥

॥

ए पा०

यस्ते गर्भममीवा दुर्णामा योनिमाशये ॥ अमीवाभ्यमनेन व्याख्यातो दुर्णामा ।
क्रिमिर्भवति पापनामा क्रिमिः क्रव्ये मेद्यतिक्रमतेर्वा स्यात्सरणकर्मणः क्राम
तेर्वा ॥ अतिक्रामन्तो दुरितानि विश्वा ॥ अतिक्रममाणा दुर्गतिगमनानि सर्वा ।
अप्वा यदेनया विद्धोऽपवीयते ॥ व्याधिर्वा भयं वा ॥ अप्वे परेहीत्यपि निगमो भ
वत्यमतिरमामयी मतिरात्ममयी ॥ ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्तु दित्यपि
निगमो भवति ॥ श्रुष्टीति क्षिप्रनामाशु अष्टीति ॥ १४ ॥ ताँ अध्वर उशतो यक्ष्यग्ने श्रु०
ष्टी भगं नासत्या पुरंधिं ॥ तानध्वरे यज्ञ उशतः कामयमानान्यजाग्ने श्रुष्टी भ
गं नासत्यौ चाश्विनौ सत्यावेव नासत्यावित्यौर्णवाभः सत्यस्य प्रणेतारावि

॥९१॥

त्याग्रायणो नासिकाप्रभवौ बभूवतुरिति वा पुरंधिर्बहुधीस्तत्कः पुरंधिर्भगः
पुरस्तात्तस्यान्वादेश इत्येकमिन्द्र इत्यपरं स बहुकर्मतमः पुरां च दारयितृतमो
वरुण इत्यपरं तं प्रज्ञया स्तौतीति ॥ इमामूनु कवितमस्य मायामित्यपि निगमो भ
वति ॥ रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः ॥ समिद्धस्य रुशददर्शि पाज
इत्यपि निगमो भवति ॥ १५ ॥ अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यं ॥०
अस्ति हि वः समानजातिता रशयदारिणो देवा अस्त्याप्यमाप्नोतेः सु
दत्रः कल्याणदानः ॥ त्वष्टा सुदत्रो विदधातु रायः इत्यपि निगमो भवति ॥ सुवि
दत्रः कल्याणविद्यः ॥ आग्ने याहि सुविदत्रेभिरर्वाङ् इत्यपि निगमो भवत्यानु

॥

षगितिनामानुपूर्वस्यानुषक्तं भवति ॥ स्तृणंति बर्हिरानुषगित्यपि निगमो भ
वति ॥ तुर्वणिस्तूर्णवनिः ॥ स तुर्वणिर्महाँ अरेणु पौंस्य इत्यपि निगमो भव
ति ॥ गिर्वणा देवो भवति गीर्भिरेनं वनयंति ॥ जुष्टं गिर्वणसे बृहदित्यपि
निगमो भवति ॥ १६ ॥ असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्नि
मानि ॥ असुसमीरिताः सुसमीरिते वाजसमीरिता माध्यमिका देवगणास्ते
रसेन पृथिवीं तर्पयंतो भूतानि च कुर्वंति तत्रायजंतेच्यतिक्रांतं पतितवच
नं ॥ अम्यक्सा त इंद्र ऋष्टिः ॥ अमाक्तेति वाभ्यक्तेति वा ॥ यादृश्मिन्धायितमप
स्यया विदत् ॥ यादृशे धायितमपस्यया विदत् ॥ उस्रः पितेव जारयायि

॥ ९२ ॥

स्थु

यज्ञैः ॥ उस्र इव गोपिता जायायि यज्ञैः ॥ १७ ॥ प्र वोच्छा जुजुषाणासो अस्थुरभू
त विश्वे अग्रियोत वाजाः ॥ प्रास्थुर्वो जोषयमाणा अभवत सर्वेग्र गमने
नेति वाग्रसंपादिन इति वापि वाग्रमित्येतदनर्थकमुपबंधमाददीत ॥ अ
हीदिंद्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमं ॥ अहीद्र प्रस्थितानी
मानि हवींषि चनो दधिष्व चन इत्यन्ननाम पचतिर्नामीभूत ॥ तं मेदस्तः प्रति र्नी
पचताग्रभीष्टाम इत्यपि निगमो भवत्यपि वा मेदसश्च पशोश्च सात्वंद्विवचनं
च स्याद्यत्र ह्येकवचनार्थः प्रसिद्धं तद्भवति ॥ पुरोलाश्चाग्ने पचत इति यथा ॥ सुरु
घश्चापो भवंति शुचं संरुंधंति ॥ शंतस्य हि सुरुधः संति पूर्वीरित्यपि निगमो

३॥

भवत्यमिनोमितमात्रोमहान्भवत्यभ्यमितोवा॥ अमिनःसहोभिरित्यपिनि
गमोभवति॥ जझ्झतीरापोभवंतिशब्दकारिण्यः॥ मरुतोजझ्झतीरिवेत्य
पिनिगमोभवत्यप्रतिष्कुतोप्रतिष्कृतोप्रतिस्खलितोवा॥ अस्मभ्यमप्रतिष्कु
तइत्यपिनिगमोभवति॥
शाशदानःशाशाद्यमानः॥ प्रस्वांमतिमतिरच्छाशदानइत्यपिनिगमोभव
ति॥ १८॥ षष्ठ॥०॥ तृतीयःपादः॥ सृप्रःसर्पणादिदमपीतरत्सृप्रमेतस्मादे
वसर्पिर्वातैलंवा॥ सृप्रकरस्नमूतयइत्यपिनिगमोभवति॥ करस्नौबाहूक
र्मणांप्रस्नातारौसुशिप्रमेतेनव्याख्यातं॥ वाजेसुशिप्रगोमतीत्यपिनिग

॥ ९३

ना

मोभवति॥ शिप्रेहनूनासिकेवाहनुर्हन्तेर्नासिकानसतेः॥ विष्यस्वशिप्रेविसृज
स्वधेनेइत्यपिनिगमोभवति॥ धेनादधातेरंसुरमणात्॥ सचिवेतांश्चिकि
तेरंसुसंसेत्यपिनिगमोभवति॥ द्विबर्हाद्वयोस्स्थानयोःपरिवृढोमध्यमेचस्था
नउत्तमेच॥ उतद्विबर्हाअमिनःसहोभिरित्यपिनिगमोभवत्य[illegible]क्रआ
क्रमणात्॥ अक्रोनबभ्रिःसमिथेमहीनामित्यपिनिगमोभव[illegible]त्युराणउ
रुकुर्वाणः॥ दूतईयसेप्रदिवउराणइत्यपिनिगमोभवति॥ १९॥ स्तियाआपो
भवंतिस्त्यायनात्॥ वृषासिंधूनांवृषभःस्तियानामित्यपिनिगमोभवति॥
स्तिपास्तियांपालनउपस्थितान्पालयतीति॥ सनःस्तिपाउतभवातनूपा

४॥

इत्यपि निगमो भवति ॥ जबारु जवमानरोहि जरमाणरोहि गरमाणरोही
ति वा ॥ अग्रे रूपआरुपितं जबार्वित्यपि निगमो भवति ॥ जरूथं गरूथं गृणा
तेः ॥ जरूथं हन्यक्षि राये पुरंधिमित्यपि निगमो भवति ॥ कुलिश इति व
ज्रनाम कूलशातनो भवति ॥ स्कंधांसीव कुलिशेना विवृक्णाहिः शयत
उपपृक्पृथिव्याः ॥ स्कंधो वृक्षस्य समास्कंनो भवती दमपीतर स्कंध एतस्मा
देवास्कंनं काये अहिः शयत उपपर्चनः पृथिव्यास्तुंजस्तुंजतेर्दानकर्मणः
॥२०॥ तुंजे तुंजे य उत्तरे स्तोमा इंद्रस्य वज्रिणः ॥ न विंधे अस्य सुष्टुतिं ॥
दाने दाने य उत्तरे स्तोमा इंद्रस्य वज्रिणो नास्य तैर्विंदामि समाप्तिं स्तुते

॥९४॥

बर्हणा परिबर्हणा ॥ बृहच्छ्रवा असुरो बर्हणा कृत इत्यपि निगमो भवति ॥२१॥
यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह ॥ अपाप
शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः ॥ घ्रंस इत्यहर्नाम
ग्रस्यंतेस्मिन्रसा गोरूध उद्धततरं भवत्युपोढमिति वा ॥ स्नेहानुप्रदा
नसामान्याद्रात्रिरप्यूध उच्यते स यो अस्मा अहन्यपि वा रात्रौ सोमं सुनोति
भवतिह द्योतनवानपोहत्यपोहति शक्रस्ततनिषुं धर्मसंतानादपेतम
लंकरिष्णुमयज्वानं तनूशुभ्रं तनूशोभयितारं मघवा यः कवासखो यस्य
कपूयाः न्याविध्यदिलीबिशस्य दृळ्हा वि शृंगिणमभिनच्छुष्णमिंद्रः ॥ नि
सखायः ॥

९५॥

रविध्यदिलाबिलशायस्यदृह्वानिव्यात्तिनच्छृंगिणंशुष्णमिंद्रः॥२२॥अस्माइ
दुप्रभराततुजानोवृत्रायवज्रमीशानःकियेधाः॥गोर्नपर्वविरदातिर
श्चेष्यन्नर्णांस्यपांचरध्यै॥अस्मैप्रहरतूर्णंत्वरमाणोवृत्रायवज्रमीशानःकि
येधाःकियद्धाइतिवाक्रममाणधाइतिवा॥गोरिवपर्वाणिविरदमेघस्ये
ष्यन्नर्णांस्यपांचरणायभृमिर्भ्राम्यतेः॥भृमिरस्यृषिकृन्मर्त्यानामित्यपिनि
गमोभवति॥विष्पितोविप्राप्तः॥पारंनोअस्यविष्पितस्यपर्षन्नित्यपिनिग
मोभवति॥२३॥तंन्नस्तुरीपमद्भुतंपुरुवारंपुरुत्मना॥त्वष्टापोषायविष्यतु
रायेनाभानोअस्मयुः॥तंनस्तूर्णापिमहत्संभृतमात्मनात्वष्टाधनस्यपोषा

॥९५

तेर्वा

यविष्यत्वित्यस्मयुरस्मान्कामयमानोरास्पिनोरास्पीरपतेर्वोक्षंरास्पिनः
स्यायोरित्यपिनिगमोभवत्यृंजतिःप्रसाधनकर्म्मऋजुरित्यप्यस्यभवति
ऋजुनीतीनोवरुणइत्यपिनिगमोभवति॥प्रतद्वसुःप्राप्तवसुः॥हरीइंद्र
प्रतद्वसूअभिस्वरेत्यपिनिगमोभवति॥२४॥हिनोतानोअध्वरंदेवय
ज्याहिनोतब्रह्मसनयेधनानां॥ऋतस्ययोगेविष्यध्वमूधःश्रुष्टीवरी
र्भूतनास्मभ्यमापः॥प्रहिणुतनोध्वरंदेवयज्यायैप्रहिणुतब्रह्मधनस्य
सननायऋतस्ययोगेयज्ञस्ययोगेयाज्ञेशकटइतिवाशकटंशकृद्दतंभव
तिशनकैस्तकतीतिवाशब्देनतकतीतिवा॥सुखवतीर्भूतनास्मभ्यमा

रीपा०

मापः॥ चोष्कूयमाण इंद्र भूरि वामं॥ ददर्दिंद्र वकुवननीयं॥ एधमान
द्विडुभयस्यराजाचोष्कूयतेविशइंद्रोमनुष्यान्॥ व्यक्तदस्यचैधमानानहर्द्वे
ष्ट्यसुन्वतः सुन्वतोभ्यादधात्युभयस्यराजादिव्यस्यचपार्थिवस्यचचोष्कू
यमाण इतिचोष्कूयतेश्चर्करीतवृत्तंसुमत्स्वयमित्यर्थः॥ उपप्रागात्सुमन्मे
धायिमन्म॥ उपप्रैतुमांयन्ममनोध्यायि यज्ञेनेत्याश्वमेधिकोमंत्रो दिवि
ष्टिषुदिवएषणेषु॥ २४॥ स्थूरंराधःशताश्वंकुरुंगस्यदिविष्टिषु॥ स्थूरः स
माश्रितमात्रोमहान्भवत्यणुरणुस्थवीयांसमुपसर्गलुप्तोनामकरणो
यथासंप्रत्तिकुरुंगोराजाबभूवकुरूगमनाद्वाकुलगमनाद्वाकुरुःकृं ॥९६॥

उअ२ तिदिवंडीन्वं २

ततेः क्रूरमित्यप्यस्यभवतिकुलंकुस्मातेर्विकुषि[illegible]तंभवतिदूतोव्याख्यातो
जिन्वतिःप्रीतिकर्मा॥ भूमिंपर्जन्याजिन्वंतीत्यपिनिगमोभवति॥ २५॥
षष्ठाध्यायस्यचतुर्थःपादः॥ अमत्रोमात्रोमहान्भवत्यभ्यमितोवा॥ महाँअ
मत्रोवृजनेविरप्शीत्यपिनिगमोभवति॥ स्तवेवऋचीषमः॥ स्तूयतेव
ऋचासमोनर्शरातिमनश्लीलदानमश्लीलंपापकममश्रिमद्विषमं॥ अनर्शरा
तिंवसुदामुपस्तुहीत्यपिनिगमोभव[illegible]नर्वोप्रत्यृतोन्यस्मिन्॥ अनर्वाणं
वृषभंमंद्रजिह्वंबृहस्पतिंवर्द्धयानव्यमर्कैः॥ अनर्वमप्रत्यृतमन्यस्मिन्वृ
षभंमंद्रजिह्वंमंदनजिह्वंमोदनजिह्वमितिवाबृहस्पतिंवर्द्धयानव्यम

कैरन्वैनीयैस्तैर्मैर सामि सामि प्रतिषिद्धं सामि स्यतेः॥ असाम्योजो बिभृ
था सुदानवः॥ असुसमाप्तं बलं बिभृथ कल्याणदानाः॥२७॥ मा त्वा सोमस्य
गल्दया सदा याचन्नहं गिरा॥ भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न
याचिषत्॥ मा चुक्रुधं त्वा सोमस्य गालनेन सदा याचन्नहं गिरा गीत्या स्तु
त्या भूर्णिमिव मृगं न सवनेषु चुक्रुधं क ईशानं न याचिष्यतीति॥ आ त्वा
विशंत्विंदव आगल्दा धमनीनां॥ नानाविभक्ती चेते भवतो गलनाध
मनीनामिति चत्वार्थेः॥ न पापासो मनामहे नारायासो न जल्हवः॥ न पा
पा मन्यामहे नाधना न ज्वलनेन हीना अस्त्यस्मासु ब्रह्मचर्यमध्ययनं

तपो दानकर्मेत्यृषिरवोचद्बकुरो भास्करो भयंकरो भासमानो द्रवती
ति वा॥२८॥ यवं वृकेणाश्विना वपंतेषं दुहंता मनुषाय दस्रा॥ अभि दस्युं
बकुरेणा धमंतोरु ज्योतिश्चक्रथुरार्याय॥ वृको लांगलं भवति विकर्तना
ल्लांगलं लगतेर्लांगूलवद्वा लांगूलं लगतेर्लंगतेर्लंबतेर्वान्नं दुहंतौ म
नुष्याय दर्शनीयावभिधमंतौ दस्युं बकुरेण ज्योतिषा वोदकेन वार्याये
श्वरः पुत्रो बेकनाटाः खलु कुसीदिनो भवंति द्विगुणकारिणो वा द्विगु
णदायिनो वा द्विगुणं कामयंत इति वा॥ इंद्रो विश्वान्बेकनाटाँ अहर्दृश उ
त क्रत्वा पणींरभि॥ इंद्रः सर्वान्बेकनाटानहर्दृशः सूर्यदृशो य इमान्यहा

निपरयंपतिनप [illegible] राली तिवाभिभवतिकर्मणापर्णैश्चवणिजः॥२९॥जीवान्नो
अभिधेतनादित्यासःपुराहथात्॥कद्धस्थहवनश्रुतः॥जीवतोनोभिधावता
दित्याःपुराहननात्क्वनुस्थह्वानश्रुतइतिमत्स्यानांजालमापन्नानामेतदार्षंवे
दयंतेमत्स्यामधाउदकेस्यंदंतेमाद्यंतेन्योन्यंभक्षणायेतिवाजालंजलचरं
भवतिजलेभवंवाजलेशयंवांहुरोरुस्वानेहूरणमित्यर्णस्पभवत्ति॥हूरण्व
न्नंहूरणाद्दुर्विचित्यपिनिगमोभवति॥सप्तमर्यादाःकवयस्ततक्षुस्तासामेकामि
दभ्यंहुरोगात्॥सप्तमर्यादाःकवयश्चक्रुस्तासामेकामप्यधिगच्छन्नंहस्वान्भ
वतिस्तेयंतल्पारोहणंब्रह्महत्यांभ्रूणहत्यांसुरापानंदुष्कृतकर्मणःपुनःपुनः

वं पा०

ना

सेवांपातकेनृतोद्यमितिबतइतिनिपातःखेदानुकंपयोः॥३०॥बतोबतासियमनै
वतेमनोहृदयंचाविदाम॥अन्याकिलत्वांकक्ष्येवयुक्तंपरिष्वजातेलिबुजेववृक्षं॥
बतोबलादतीतोभवतिदुर्बलोबतासियमनैवतेमनोहृदयंचविजानाम्यन्या
किलत्वांपरिष्वंक्ष्यतेकक्ष्येवयुक्तंलिबुजेववृक्षंलिबुजाव्रततिर्भवतिलीयते
विभजंतीतिव्रततिर्वरणाच्चशयनाच्चततनाच्चवाताप्यमुदकंभवतिवातए
तदाप्याययति॥पुनानोवाताप्यंविश्वश्चंद्रमित्यपिनिगमोभवति॥वनेनवायो
न्यधायिचाकन्॥वनइववायोवेःपुत्रश्चायन्नितिवाकामयमानइतिवावे
तिवयइतिचचकारशाकल्यउदात्तंत्वेतदाख्यातमभविष्यदसुसमाप्तश्चा

थेरथर्यतीति सिद्धस्तत्सूरथं कामयत इति वा॥ एष देवो रथर्यतीत्यपि निगमो
भवति॥ धेनुं न इषं पिन्वतमसक्रां॥ असंक्रमणी॥ ३१॥ षष्ठाध्यायस्य पंचमः पादः॥
आधव आधवनात्॥ मतीनां च साधनं विप्राणां चाधवमित्यपि निगमो भवत्यन
वब्रवोनवक्षिप्रवचनः॥ विजेषकृदिंद्र इवानवब्रव इत्यपि निगमो भवति॥
३२॥ अरायिकाणे विकटे गिरिं गछ सदान्वे॥ शिरिंबिठस्य सत्वभिस्तेभिष्ट्वा
चातयामसि॥ अदायिनि काणे विकटे काणेविक्रांतदर्शन इत्यौपमन्यवः
कणतेर्वा स्यादणुभावकर्मणः कणतिः शब्दाणुभावे भाष्यते कणतीति मा
त्राणुभावात्कणं दर्शनादणुभावाद्वा काणे विकटे विक्रांतगत्तिरि चौपमन्य

वः कुटतेर्वा स्याद्विकुटितो भवति गिरिं गछ सदानोनुवे शब्दकारिके॥ शि
रिंबिठस्य सत्वभिः॥ शिरिंबिठो मेघः शीर्यते बिठे बिठं बीरिटेन व्याख्यातं
तस्य सत्वैरुदकैरिति स्यात्तेभिष्ट्वा चातयामो पिवा शिरिंबिठो भारद्वाजः काल
कर्णोपेतो लक्ष्मीर्निर्णाशयांचकार तस्य सत्वैः कर्मभिरिति स्यात्तेभिष्ट्वा चातया
मश्चातयतिर्नाशने पराशरः पराशीर्णस्य वसिष्ठस्य स्थविरस्य जज्ञे॥ परा
शरः शतयातुर्वसिष्ठ इत्यपि निगमो भवतींद्रोपि पराशर उच्यते शातयि
तायातूनां॥ इंद्रोयातूनामभवत्पराशर इत्यपि निगमो भवति॥ क्रिविर्दती
विकर्तनदंती॥ यत्राबोदिद्युद्रद ति क्रिविर्दतीत्यपि निगमो भवति॥ कर

ळतीकरूळती॥३३॥ वामंवामंतआदुरेदेवोददात्वर्यमा॥ वामंपूषावामंभगो
वामंदेवःकरूळती॥ वामंवननीयंभवत्यादुरिरादरणात्कंकरूळती
भगःपुरस्तात्तस्यान्वादेशइत्येकंपूषेत्यपरंसोदंतकोदंतकःपूषेतिचब्रा
ह्मणं॥ दन्तोविशाङ्डम्मध्ववाचः॥ दानमनसोनोमनुष्यानिंड्मर्दुबाचःकु
रु॥ अवीरामिवमामयंशरारुरभिमन्यते॥ अबलामिवमामयंबालोभिम
न्यतेसंशिशरिषुरिदंयुरिदंका मयमानोथापितद्वदर्थेभाष्यतेवसुयुरिं
द्रोवसुमानिचयशार्थः॥ अश्वयुर्गव्यूरथयुर्वसूयुरित्यपिनिगमोभवति॥३४॥
किंतेकृण्वंतिकीकटेषुगावोनाशिरंदुह्रेनतपंतिघर्मं॥ आनोभरप्रम

॥१००॥

गंदस्यवेदोनैचाशाखंमघवन्रंधयानः॥ किंतेकुर्वंतिकीकटेषुगावःकीक
टानामदेशोनार्यनिवासःकीकटाःकिंकृताःकिंक्रियाभिरितिप्रेप्सावानैवचा
शिरंदुह्रेनतपंतिघर्मंहर्म्यमाहरनःप्रमगंदस्यधनानिमगंदःकुसीदी
मांगदोमामागमिष्यतीतिचददातितदपत्यंप्रमगंदोत्यंतकुसीदःकुलीनः
प्रमदकोवायमेवास्तिलोकोनपरइतिप्रेप्सुःपंडकोवापंडकःपंडगःप्रार्द्दको
५ यो वाप्रार्द्दयत्यांडावांडावाणीइवव्रीडयतितत्संनैचाशाखंनीचाशाखोनीचैः
शाखःशाखाःशक्नोतेराणिरणात्तंनोमघवन्रंधयेतिरध्यतिर्वशगम
नेबुंदइषुर्भवतिभिंदोवाभयदोवाभासमानोद्रवतीतिवा॥३५॥ तुविक्षंते

१॥

सुकृतंसूमयंधनुःसाधुर्बुंदोहिरण्ययः॥उभातेबाहूरण्यासुसंस्कृतऋ
दूपेचिदृदूवृधा॥उविक्षंबहुविक्षंमहाविक्षेपंवातेसुकृतंसूमयंसुसुरवं
धनुःसाधयितातेबुंदोहिरण्मयउभौतेबाहूरमणीयौसांग्राम्यौवर्दूपे
अर्दनपातिनौगमनपातिनौवामर्मण्यर्दनवेधिनौगमनवेधिनौवा॥३६॥
निराविध्यद्गिरिभ्यआधारयत्पक्वमोदनं॥इंद्रोबुंदंस्वाततं॥निरविध्यद्गि २५
रिभ्यआधारयत्पक्वमोदनमुदकदानंमेघं॥इंद्रोबुंदंस्वाततं॥वंदंबुंदेन
व्याख्यातंवृंदारकश्च॥३७॥अयंयोहोताकिरुसयमस्यकमप्यूहेयत्समंजं
न्तिदेवाः॥अहरहर्जायतेमासिमास्यथादेवादधिरेहव्यवाहं॥अयंयोहो

॥१०१

र्द्धमासे २

ताकर्त्तासयमस्यकमप्यन्नमभिवहतियत्समश्नुवंतिदेवाअहरहर्जायते
मासेमास्तेर्द्धमासेवाथदेवानिदधिरेहव्यवाहमु[illegible]र्णोतेर्वृणोतेर्वा॥म
हत्तदुल्बंस्थविरंतदासीदित्यपिनिगमोभवत्यृबीसमपगतभासम
पहृतभासमन्तर्हितभासंगतभासंवा॥३८॥हिमेनाग्निंघ्रंसमवारय
येथांपितुमतीमूर्जमस्माअधत्तं॥ऋबीसेअत्रिमश्विनावनीतमुन्निन्य
थुःसर्वगणंस्वस्ति॥हिमेनोदकेनग्रीष्मांतेग्निंघ्रंसमहरवारयेथामन्नव
तींचास्माऊर्जमधत्तमश्विनौयोयमृबीसेपृथिव्यामग्निरंतरौषधिवनस्प
तिष्वप्सुतमुन्निन्यथुःसर्वगणंसर्वनामानंगणोगणनाद्गुणश्चयद्दृ

र्दुघ घयत इष्ट्वंति प्राणिनश्च पृथिव्यां तदश्विनो रूपं तेनैनौ स्तौति स्तौति ॥ ३९ ॥
षष्ठाध्यायस्य चतुर्थः पादः ॥ इति षष्ठोध्यायः समाप्तः ॥ इति नैरुक्तं पूर्वार्द्धं समाप्तं ॥
संवत १८०८ वर्षे श्रावद ७ भृगुवासरे लिष्यतीयं ॥ यादृशं पुस्तकं दृष्ट्वा ता-
दृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ श्रीरस्तु ॥
[illegible]
पोथी छै ॥ श्री ॥ गौरिपुर महाराजल श्री शिवसिंहजी विजयराज्ये
आनंतन नागर ज्ञातिय [illegible] नार्थे इदं पुस्तकं
आ पोथी को कनण वाचवा मागे तणा जो वाचवा मागे तो आपो नषे पासी ज ने ओ नहीं
स्वदै [illegible] संवत १८०८ [illegible] न मारो प्रत से वाछै ॥

२७
२८
३५
३६
३७
३८